Digitized by Arya Samaj Foundation Chennai and eGangotri

६२
२६

६२२
२६

६२२
२६

CC-0. Gurukul Kan

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय
विषय संख्या 622/26 आगत नं० 84,230
लेखक
शीर्षक

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

गुरुकुल काँगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि न लगायें।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४८,४३०

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार
वर्ग संख्या ६२२/२६ आगत संख्या ४८,४३०
पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित 30 वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा 50 पैसे प्रति दिन के हिसाब से विलम्ब दण्ड लगेगा।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४६,५३०

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ इदं पुस्तकं काश्यां गोवर्धनदासाभिधेयेन मया हरिहररत्नाकराख्य स्वीय यन्त्रालयेऽङ्कितम् ॥

अथापोदेवीमीमांसान्यायप्रकाशः प्रारभ्यते ॥

यह सब पुस्तक काशीमें कुंजगली के पश्चिम फाटक पर गोवर्धन शाहु के दुकान पर है संवत १९४९ ॥

CHECKED 1973

1949
57
1892

CC-0. Gurukul Kangri Collection, Haridwar

भा.श्री. ॥ श्रीगणेशायनमः॥ यत्कृपालेशमात्रेणपुरुषार्थचतुष्टयम्॥ प्राप्यतेतमहंवंदेगोविन्दंभक्तवत्सलम्॥ १॥ अनंतगुणसंपन्नमनन्तभजन-
१ प्रियम्॥ अनन्तरूपिणंवंदेगुरु[मा]नन्दरूपिणम्॥ २॥ इहखलुपरमकारुणिकेनभगवताजैमिनिऋषिणाऽथातोधर्मजिज्ञासेत्यादिनाद्वादशलक्ष्या
मेतुधर्मोविचारितः तत्रवेदेनप्रयो[ज]नमुद्दिश्यविधीयमानोऽर्थोधर्मः यथायागादिः सहियजेतस्वर्गकामइत्यादिवाक्येनस्वर्गमुद्दिश्यविधीयते तथा
हि यजेतेत्यत्रास्त्यंशद्वयं यजिर्धातुः प्रत्ययश्च तत्रप्रत्ययेप्यस्त्यंशद्वयम्। आख्यातत्वंलिङ्त्वंच आख्यातत्वं चदशसुलकारेष्वविद्यतेलिङ्त्वंच
पुनः केवलंलिङ्येव तत्राख्यातत्वलिङ्त्वाभ्यांभावनैवोच्यते भावनानामभवितुर्भवनानुकूलोभावकव्यापारविशेषः साचद्विविधा शाब्दीभावनाऽर्थीभाव
नाचेति तत्रपुरुषप्रवृत्त्यनुकूलभावकव्यापारविशेषः शाब्दीभावना साचलिङ्त्वांशेनोच्यते लिङ्श्रवणेऽयंमांप्रवर्तयतीतिमत्प्रवृत्त्यनुकूलव्यापार
वानयमितिनियमेनप्रतीयमानत्वात् यच्चयस्मात्प्रतीयते तत्तस्यवाच्यं यथागोशब्दस्यगोत्वं सचप्रवृत्त्यनुकूलव्यापारविशेषोलोकेपुरुषनिष्ठो
भिप्रायविशेषः वेदेतुपुरुषाभावात् लिङादिशब्दनिष्ठएवनहिवेदः पुरुषनिर्मितः वेदस्याध्ययनंसर्वंगुर्वध्ययनपूर्वकं वेदाध्य
यनसामान्यादधुनाध्ययनंयथेत्यादिनावेदापौरुषेयत्वस्यसाधितत्वात् यः कल्पः सकल्पपूर्वेइतिन्यायेनसंसारस्यानादित्वादीश्वरस्यचसर्वज्ञत्वा
दीश्वरोगतकल्पीयंवेदमस्मिन्कल्पेस्मृत्वाउपदिशतीत्येतावतैवोपपत्तौप्रमाणान्तरेणार्थमुपलभ्यरचितत्वकल्पनानुपपत्तेश्चनतत्रपुरुषाभावा
च्छब्दनिष्ठैवसा अतएवशाब्दीभावनेतिव्यपदिशंतिसाचशाब्दीभावनांशत्रयमपेक्षते साध्यंसाधनमितिकर्तव्यतांचेति तत्रसाध्याकांक्षायांवक्ष्यमा
णांशत्रयोपेताऽर्थीभावनासाध्यत्वेनसंबध्यते एकप्रत्ययगम्यत्वेनसमानाभिधानश्रुतेः यद्यपिसंख्यादीनामप्येकप्रत्ययगम्यत्वंसमानंतथाप्य ॥ राम:
योग्यत्वान्नतेषांभाव्यत्वेनान्वयः करणाकांक्षायांलिङादिज्ञानंकरणत्वेनसंबध्यते तस्यचकरणत्वं [illegible] ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिज्ञानेसन्निकर्षात्मकरूपज्ञानस्येवलिङ्गादिज्ञानात्मकशब्दधर्मभावनाया अभावप्रसंगात् किंतुभावनाभाव्यनिर्वर्त्तकत्वेनलिङ्गादिज्ञानंहिशब्द भावनाभाव्यार्थीभावनांनिर्वर्त्तयतिकुठारइवछेदनमतोलिङ्गादिज्ञानस्यकरणत्वेनान्वयइतिकर्त्तव्यताकांक्षायांप्राशस्त्यज्ञानमितिकर्त्तव्यतात्वे नसंबध्यतेतच्चप्राशस्त्यज्ञानंवायुर्वैक्षेपिष्ठादेवतेत्यर्थवादैर्जन्यतेतेह्यर्थवादाःस्वार्थप्रतिपादनेप्रयोजनमनुपलभमानालक्षणयाव्रातोःप्राश स्त्यंप्रतिपादयंतिस्वार्थमात्रपरत्वे आनर्थक्यप्रसंगात् नचेष्टापत्तिरध्ययनविध्युपात्तत्वेनानर्थक्यानुपपत्तेः॥ तथाहिस्वाध्यायोध्येतव्यइत्य ध्ययनविधिःसकलस्यवेदस्याध्ययनकर्त्तव्यतांबोधयन् सर्वोवेदःप्रयोजनवदर्थपर्यवसायीतिसूचयतिनिरर्थकस्याध्ययनानुपपत्तेः सचवेदो विधिमंत्रनामधेयनिषेधार्थवादात्मकः तत्रविधिःप्रयोजनवदर्थविधानेनार्थवान् सचाप्राप्तमर्थंविधत्तेयथाऽग्निहोत्रंजुहुयात्स्वर्गकामइतिवि धिरप्राप्तंप्रयोजनवद्धोमंविधत्तेअग्निहोत्रहोमेनस्वर्गंभावयेदितियत्रतुकर्म्मप्रकारान्तरेणप्राप्तंतत्रतदुद्देशेनगुणमात्रविधानम्॥ यथादध्नाजु हुयादित्यत्रहोमस्याग्निहोत्रंजुहुयादित्यनेनप्राप्तत्वाद्धोमोद्देशेनदधिमात्रविधानम्॥ दध्नाहोमंभावयेदिति। यत्रतूभयमप्राप्तंतत्रविशिष्टंविधत्ते तदुक्तं। नचेदन्येनशिष्टाइति शिष्टाउपदिष्टाइत्यर्थः। यथासोमेनयजेतेत्यत्रसोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानंसोमवतायागेनेष्टंभाव येदितिनचोभयविधानेवाक्यभेदःविशिष्टस्यैकत्वात् विशिष्टविधौचमत्वर्थलक्षणाययासोमपदेनमत्वर्थोलक्ष्यतेसोमवतेतिनहिमत्वर्थलक्षणांवि नासोमस्यान्वयःसंभवतियदितावत्सोमयागयोरैक्यरूपेणभावनायांकरणत्वेनैवान्वयः। सोमेनयागेनेष्टंभावयेदितिततउभयविधानेवाक्यभेदः सोमस्ययागवत्फलभावनाकरणत्वेनप्राधान्यप्रसंगापातश्चयागार्थत्वानुपपत्तिश्चयागेद्रव्यानुपपत्तिश्चप्रत्ययवाच्यभावनायाःसमानपदोपात्तेनयागे नकरणाकांक्षानिवृत्तत्वेनभिन्नपदोपात्तस्यसोमस्यकरणत्वेनान्वयानुपपत्तिश्चस्यात् यदिचवैयधिकरण्येनान्वयःतत्रनतावद्यागेनसोममित्य

प्रत्यक्षविरोधपनहिसोमोयागोभवितुमर्हतिर

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्वयः समानपदोपात्तत्वात्प्रत्ययवाच्यफलभावनायां करणत्वेनान्वितस्य यागस्य सोमकर्मकभावनान्वयानुपपत्तेः॥ यागस्य सोमार्थत्वापत्तेश्च न
चेष्टापत्तिरदृष्टद्वयापत्तेः नहि यागस्य सोमार्थत्वं दृष्टद्वारेण संभवति व्रीहिषु अवघातेनेव यागेन सोमे कस्यचिद्दृष्टस्याजननात् अतस्तेन तत्र
सोमे किंचिददृष्टं जननीयं प्रोक्षणेनेव व्रीहिषु तथा यागस्य सोमार्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वक्तव्यः भावनाकरणत्वं च भावना
भाव्यनिर्वर्तकत्वेनेत्युक्तम्। न च सोमोऽदृष्टमंतरेण फलं जनयितुं समर्थः ग्रहैर्जुहोतीति वाक्यविहितहोमेन तस्य भस्मीभावात् अतोऽदृष्टद्वया
पातान्न यागस्य सोमार्थत्वमिति न यागेन सोमं भावयेदित्यन्वयः संभवति करणत्वेनोपस्थितस्य सोमस्य साध्यत्वेनान्वयानुपपत्तेश्च। अथ सोमेन
यागं भावयेदित्यन्वयः तत्र यद्यपि सोमस्य करणत्वं न यागार्थत्वाद्यागनिर्वृत्तिर्दृष्टमेव प्रयोजनं लभ्यते इति नादृष्टद्वयापत्तिः। नापि करणत्वेनोप
स्थितस्य सोमस्य साध्यत्वान्वयानुपपत्तिः करणत्वेनैवान्वयात्। तथाप्यप्राप्तत्वाद्भावनाकरणत्वेनान्वितस्य यागस्य साध्यत्वेनान्वयानुपपत्ति
स्तदवस्थैव ननु यजेतेत्यत्र यागस्य न करणत्वेन नापि साध्यत्वेनोपस्थितिः तद्वाचकतृतीयादि अभावात् किंतु भावनायां यागसंबंधमात्रं प्रतीय
ते यागस्य च भावनासंबंधः करणत्वेन साध्यत्वेन च संभवति तत्र करणत्वांशमादाय फलसंबंधः साध्यत्वांशमादाय गुणसंबंधश्च स्यादिति चेन्मैवं य
द्यपि भावनया यागस्य संबंधमात्रं प्रतीयते तथापि करणत्वेनोपस्थितिदशायां न साध्यत्वेनोपस्थितिः संभवति विरोधात् तदवस्थं यागेन स्वर्गं भावये
दिति करणत्वेनान्वये सति पश्चात्सोमेन यागं भावयेदिति साध्यत्वेनान्वयो वक्तव्यः ततश्च वाक्यभेदः न च प्रत्ययाभिहितभावनास्वरूपे यागस्वरूप
मात्रमन्वेतीति वक्तुं युक्तं कारकाणामेव क्रियान्वयात्। तस्मिंश्च सोमस्य न यागे सामानाधिकरण्येन वान्वयः संभवतीति। ननु यजेतेत्यत्र प्रत्ययाभि
हितभावनायाः करणाकांक्षायां यथा यागः करणत्वेनान्वेति तथेतिकर्तव्यताकांक्षायां सोमस्येतिकर्तव्यतात्वेन भावनायामेवान्वयोऽस्तु किं मत्व

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्थलक्षणयेति चेन्नैवं सोमेनेति तृतीयया करणत्ववाचिन्या सोमस्येतिकर्त्तव्यतात्वानभिधानात् तत्र यदि इतिकर्त्तव्यतात्वं लक्षणयोच्यते त
तो वरं सोमपद एव प्रकृतिभूते मत्वर्थलक्षणा गुणत्वन्यायकल्पनेति न्यायात् ॥ अथ वेदो वा प्रायदर्शनादित्यधिकरणेनोक्ताऽसंजातविरोधित्व
न्यायेनान्त्ये प्रत्यय एव लक्षणेति चेत्तथापि सोमस्येतिकर्त्तव्यतात्वेनान्वयानुपपत्तिः सिद्धस्य वस्तुन इतिकर्त्तव्यतात्वाभावात् क्रियाया एवेति
कर्त्तव्यतात्वात् द्रव्यस्य केवलमंगत्वादत एवेतिकर्त्तव्यतात्वाभावात् द्रव्यस्य प्रकरणादग्रहणं। यथाहुः नावांतरक्रियायोगात् ऋते वाक्योपक-
ल्पितात् गुणद्रव्यैकथंभावैर्गृह्यंते प्रकृताः क्रिया इति तदेतदग्रे वक्ष्यामः। किंच सोमेन यजेतेति हि यागस्योत्पत्तिवाक्यं नाधिकारवाक्यं ज्योतिष्टोमे
न स्वर्गकामो यजेतेत्यस्याधिकारवाक्यत्वात् उत्पत्तिवाक्ये चनेतिकर्त्तव्यताकांक्षा इष्टविशेषाकांक्षाकलुषितत्वेनेतिकर्त्तव्यताकांक्षाया विस्पष्टा-
नुत्थानात्। तत्सिद्धं सोमस्य नेतिकर्त्तव्यतात्वेन भावनायामन्वयः तस्माद्विशिष्टविधावन्वयानुपपत्त्यावश्यं मत्वर्थलक्षणावाच्येति। नन्वेवमपि
सोमेन यजेतेत्यत्र न विशिष्टविधानं गौरवात् मत्वर्थलक्षणापाताच्च किंतु दध्ना जुहोतीतिवद्गुणमात्रविधानमस्तु विधिशक्तेर्गुणोपसंक्रमात् यथाहुः-
सर्वत्राख्यातसंबद्धे श्रूयमाणे पदान्तरे विधिशक्त्युपसंक्रांतेः स्याद्धातोरनुवादतेति नच यागस्याप्राप्तत्वान्न तदुद्देशेन सोमविधानमिति वाच्यं ॥
ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन यागस्य प्राप्तत्वात् नचास्याधिकृत्वेन नोत्पत्तिविधित्वमिति वाच्यम्। उद्भिदा यजेत पशुकाम इतिवदेकस्यैवोभ-
यविधित्वोपपत्तेः एवं च सोमेन यजेतेत्यत्र न मत्वर्थलक्षणा यदि ह्यत्र विशिष्टविधानं स्यात्तदान्वयानुपपत्त्या मत्वर्थलक्षणा स्यात् ज्योतिष्टोमेन-
स्वर्गकामो यजेतेत्यत्र तु यागविधाने क्वचिन्न मत्वर्थलक्षणा न तावदेतस्मिन् वाक्ये ज्योतिष्टोमेन यागेन स्वर्गं भावयेदिति सामानाधिकरण्येनैव ना-
मपदस्यान्वयात् नापि सोमेन यजेतेत्यत्र यागोद्देशेन सोमविधानात् सोमेन यागं भावयेदिति। नन्वनुवादेप्यस्ति मत्वर्थलक्षणा अत एवोक्तं विधाने

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्या·मी· वानुवादेवायागः करणमिष्यतेतत्समीपेतृतीयान्तस्तद्वाचित्वंनमुंचतीति अतश्चविशिष्टविधावपिगुणविधावप्यस्त्येवमत्वर्थलक्षणेतिचे।
३ न्नैवंगुणान्वयानुपपत्याहिमत्वर्थलक्षणांगीक्रियते यदाचभावनायांधात्वर्थस्यकरणत्वेनान्वयस्तदान्वयानुपपत्यासांगीकर्त्तव्यागुणवि
धौचनधात्वर्थस्यकरणत्वेनान्वयोमानाभावात् नहिदध्नाजुहोतीत्यत्रहोमस्यकरणत्वंश्रूयतेतद्वाचकतृतीयाद्यभावात् कल्पतेइतिचेन्नगुणस्य
तत्रविधित्सितत्वेनसाध्याकांक्षायांसाध्यत्वकल्पनायाएवोचितत्वात् दध्नाहोमंभावयेदिति नचायमस्तिनियमोभावनायांधात्वर्थस्यकरणत्वेनैवा
न्वयोनप्रकारान्तरेणेतिषष्ठाद्यपूर्वपक्षानुत्थानापत्तेः षष्ठाद्येहियजेतस्वर्गकामइत्यादौप्रत्ययवाच्यायांवक्ष्यमाणार्थीभावनायांसमानपदश्रु
त्यायागस्यभाव्यत्वमाशंक्यापुरुषार्थत्वेनपरिहृतंयदिचधात्वर्थस्यकरणत्वेनैवभावनायामन्वयस्तदाभाव्यत्वशंकैवनोदतीतिव्यर्थंषष्ठा
द्यमधिकरणमापद्येत किंचवाजपेयाधिकरणेतंत्रसंबंधमाशंक्यपरिहृतः धात्वर्थस्यकरणत्वेनैवान्वयेतंत्रसंबंधशंकैवनस्यात् तत्रतंत्रसंबं।
धशंकापरिहारौचव्याख्यातौकिंचनधात्वर्थस्यकरणत्वेनैवान्वयः गुणकामाधिकरणे आश्रयत्वेनधात्वर्थान्वयस्योक्तत्वात् तथाहिदधेंद्रियका
मस्यजुहुयादित्यत्रनतावद्धोमोविधीयतेतस्यवचनांतरेणविहितत्वात् नापिहोमस्यफलसंबंधः गुणपदानर्थक्यापत्तेः नापिगुणसंबंधं विधत्ते
फलपादानर्थक्यापातात् नाप्युभयसंबंधंविधत्तेप्राप्तेकर्मण्यनेकविधानेवाक्यभेदापत्तेः यथाहुः प्राप्तेकर्मणिनानेकोविधातुंशक्यतेगुणः अ।
प्राप्तेतुविधीयंतेबहवोप्येकयत्नतइति अत्रचकर्मपदवत्गुणेत्युपलक्षणं। एकोद्देशेनानेकविधानेवाक्यभेदात् अतएवग्रहैकत्वाधिकरणेग्रहं
संमार्ष्टीत्यत्रग्रहोद्देशेनएकत्वसंमार्गविधौवाक्यभेदात् ग्रहैकत्वमविवक्षितमित्युक्तंरेवत्यधिकरणेचएतस्यैवरेवतीषुवारवन्तीयमग्निष्टोमसामकृ रामः
त्वापशुकामोह्येतेनयजेतेत्यत्रवारवन्तीयस्यरेवतीसंबंधे अ[illegible]संबंधेचविधीयमानेवाक्यभेदाज्ञावनोपसर्जनंभावनांतरं॥ ३

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधीयतेइत्युक्तंतस्मात्प्राप्तेहोमेनोभयविधानंसंभवतिनापिहोमांतरंविधीयतेगौरवात् प्रकृतहानाप्रकृतकल्पनाप्रसंगाच्चमत्वर्थलक्षणाप्र
संगाच्चनापिदध्येवकेवलंकरणत्वेनविधीयतेइतियुक्तंकेवलस्यव्यापारानाविष्टस्यकरणत्वानुपपत्तेःकर्तृव्यापारव्याप्यत्वनियमात्करण।
त्वस्यकिंतर्हिविधीयतेइतिचेत् दध्नेतितृतीययोपात्तंदधिकरणत्वंफलभावनायांकरणत्वेनविधीयतेप्रत्ययार्थत्वेनदध्नोपितस्यप्राधान्यात्
एवंचदधिकरणत्वेनेंद्रियंभावयेदितिवाक्यार्थःकरणत्वंचकिंप्रतियोगिकमित्यपेक्षायांसन्निधिप्राप्तोहोमआश्रयत्वेनसंबध्यतेततश्चसिद्धो
धात्वर्थस्याश्रयत्वेनान्वयःप्रकृतमनुसरामःतत्सिद्धंधात्वर्थस्यनकरणेनैवान्वयइतिकिंतर्हिक्वचित्करणत्वेनक्वचित्साध्यत्वेनक्वचिदाश्रयत्वे
नेतिगुणविधौचसाध्यत्वेनैवान्वयःसंभवतीतिनमत्वर्थलक्षणयाप्रयोजनंकिंचगुणविधौमत्वर्थलक्षणायांगुणस्यधात्वर्थांगत्वेकिंमानमितिवक्त
व्यंनतावच्छ्रुतिःमत्वर्थलक्षणायांतृतीयाश्रुतिर्मत्वर्थस्यैवांगत्वेमानंस्यात् नगुणस्यांगत्वेसमभिव्याहारात्मकंवाक्यमितिचेत्तत्किंस्वतंत्रमेवमान
मुतलिंगश्रुतीकल्पयित्वानाद्यः॥बलाबलाधिकरणविरोधात् तत्रहिवाक्यंलिंगश्रुतिकल्पयित्वांगत्वेमानमित्युक्तम् द्वितीयेप्रत्यक्षांश्रुतिमुल्लंघ्य
श्रुत्यंतरकल्पनेतस्याएववाआवृत्तिकॢप्नेव्यर्थःप्रयासःसमाश्रितःस्यात् विशिष्टविधौचागत्यातदाश्रयणंकिंचभवतुश्रुत्यंतरकल्पनंतथापित
त्सहकृतःप्रत्यक्षएववाविधिर्धात्वर्थांगत्वेनगुणंविधत्तेउतकल्पितंविध्यंतरंकल्पितमितिचेन्नश्रुतविधेर्व्यर्थतापत्तेःनहितेनतदागुणोविधीय
तेकल्पितविध्यंतरांगीकारात् नापिधात्वर्थःतस्यवचनांतरेणविहितत्वात् अथश्रूयमाणएवविधिःकल्पितश्रुतिसहकृतो——धात्वर्थांगत्वेन
गुणंविधत्तेइतिचेत् तर्हितत्रकथंधात्वर्थस्यान्वयःकरणत्वेनेतिचेन्नअन्वयानुपपत्तेःनहिसंभवतिदध्नाहोमेनेतिचान्वयःसाध्यत्वेनैवान्वयोदध्ना
होमंभावयेदितिचेन्न तथासत्यनुवादेपिधात्वर्थःकरणत्वेनैवान्वेतीत्येतदुपेक्षितंस्यात्।विवक्षितवाक्यार्थश्चाविनैवमत्वर्थलक्षणयांगीकृतःस्यात्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्या·मी· तस्मान्नगुणविधौमत्वर्थलक्षणायत्तुविधानेवानुवादेवेतिवार्त्तिकंतस्मलीतिमवलंब्यनवस्तुगतिं तथाहि यावद्धिअग्निहोत्रंजुहुयादितिवाक्यं
४ नालोच्यते केवलंचदध्नाजुहोतीतिवाक्यमालोच्यते तदाषष्ठाद्यन्यायेनहोमस्याभाव्यतांजानतांप्रतिपदाधिकरणभावार्थाधिकरणवासना
वासितानांभवत्येतादृशीमतिः यद्दधिसत्ताहोमेनेष्टंभावयेदितिप्रतिपदाधिकरणेहिसोमेनयजेतेत्यादिषुकिंगुणधात्वर्थयोः फलभावनाकरण
त्वेनान्वयःउतएकस्यैवेतिसंदिह्यप्रधानसंबंधलाभात् विनिगमनाविरहाञ्चसर्वेषांफलभावनाकरणत्वेनान्वयमाशंक्यलाघवादेकस्यैवभावना
करणत्वमित्युक्तंभावनाकरणत्वंहिभावनाभाव्यनिर्वर्त्तकतयाभाव्यंचस्वर्गादिनादृष्टमंतरेणेति अनेकेषांकरणत्वेऽनेकादृष्टकल्पनाप्रसंगात् त
स्मादेकस्यैवकरणत्वंयद्यप्येकस्यतदापिकिंद्रव्यगुणयोः फलभावनाकरणत्वमुतधात्वर्थस्येतिभावार्थाधिकरणेसंदिह्यद्रव्यगुणयोरेवभावनाकर
णत्वंभूतभव्यायोपदिश्यतेइति न्यायादित्याशंक्यधात्वर्थस्यैवभावनाकरणत्वंपरभुतेवंलोपस्त्वादित्युक्तं अतश्चसिद्धमेतद्वाक्यांतरानालोचनदशा
यांगुणविधावपिधात्वर्थस्यकरणत्वाशंकायांगुणपरेमत्वर्थलक्षणेति यदात्वग्निहोत्रंजुहोतीति होमविधायकंवाक्यान्तरमालोच्यतेतदाहोम
स्यवाक्यांतरेणैवविहितत्वात्तदुद्देशेनगुणमात्रविधीयतइत्यालोचनान्नमत्वर्थलक्षणेति। अतएवोक्तंपार्थसारथिमिश्रैराघाराग्निहोत्राधिकरणे
फलतोगुणविधिरयंनप्रतीतितइतियद्वा एतद्वार्तिकमधिकारविध्यभिप्रायं। उद्भिदायजेतेत्यादौनामधिकारात् तत्रहियागोविधीयतामुत्पत्तिवा
क्यसिद्धोवानूद्यतामुभयथापिकरणत्वेनान्वयात् तृतीयांतस्यतद्वाचित्वं। अन्यथाऽन्वयानुपपत्तेरिति तस्माद्गुणविधौविनापिमत्वर्थलक्षणया
अन्वयोपपत्तेर्नमत्वर्थलक्षणेतिअतश्चसोमेनयजेतेत्यत्रनविशिष्टविधानंकिंतुगुणमात्रविधानंयागस्तुज्योतिष्टोमेनस्वर्गकामोयजेतेत्यतस्मि रामः
न्वाक्येविधीयतइत्येवयुक्तम्। अन्यथामत्वर्थलक्षणापत्तेरिति अत्रोच्यते यद्यपियागोद्देशेनसोमविधौनमत्वर्थलक्षणातथापियागस्याप्राप्तत्वा ४

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्टोमेन यजेतेत्यत्र न यागोद्देशेन सोमविधानं संभवति न च ज्योतिष्टोमेनेत्यादिना प्राप्तत्वात्तदुद्देशेन गुणमात्रं विधीयत इति वाच्यम्। तस्याधिकारविधित्वेनोत्पत्तिविधित्वानुपपत्तेः कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः तेन च विहितस्य कर्मणः फलविशेषसंबंधमात्रमधिकारविधिना क्रियते फलविशेषसंबंधबोधकस्याधिकारविधित्वात् यथा आग्नेयोऽष्टाकपालो भवतीत्येतद्विहितस्य कर्मणः फलविशेषसंबंधमात्रं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं विधत्ते तस्याधिकारविधित्वं नोत्पत्तिविधित्वं स्यादेतत् दर्शपूर्णमासाभ्यामित्येतस्य नोत्पत्तिविधित्वं संभवति आग्नेयोऽष्टाकपाल इत्यादिवाक्यानर्थक्यापत्तेः न हि तेन तदा कर्म विधीयते तस्य दर्शपूर्णमासाभ्यामित्यनेन विहितत्वात् नापि गुणविधानं संभवति प्राप्ते कर्मणि अनेकगुणविधाने वाक्यभेदापत्तेः अत आग्नेयोऽष्टाकपाल इत्यस्योत्पत्तिविधित्वं दर्शपूर्णमासाभ्यामित्यस्य चाधिकारविधित्वं युक्तम्। ज्योतिष्टोमेनेत्यस्याधिकारविधेरुद्भिदा यजेत पशुकाम इत्यादिवदुत्पत्तिविधित्वे स्वीक्रियमाणे न कस्यचिदानर्थक्यं सोमेन यजेतेत्यस्य गुणविधित्वान् यागोद्देशेन सोममात्रविधानाच्च न वाक्यभेद इति चेन्नैवं यद्यपि सोमेन यजेतेत्यत्र लाघवान्न वाक्यभेदः तथापि ज्योतिष्टोमेनेत्यस्मिन्वाक्ये कर्मस्वरूपे तस्य च फलसंबंधे विधीयमाने गौरवलक्षणो वाक्यभेदोऽस्त्येव सोमेन यजेतेत्येतद्वाक्यविहितकर्मणः फलसंबंधमात्रविधाने तदभावात्। उद्भिदा यजेतेत्यत्र तु वचनांतराभावेनागत्या तदाश्रयणम्। न च सोमेन यजेतेत्यत्रापि कर्मस्वरूपे गुणे च विधीयमाने वाक्यभेदः स्यादिति वाच्यम्॥ श्रूयमाणेन विधिना गुणस्याविधेयत्वात्॥ विशेषणविधेरार्थिकत्वात् सर्वत्र हि विशिष्टविधौ विशेषणविधिरार्थिकः ज्योतिष्टोमेनेत्यस्योत्पत्तिविधित्वे कर्मस्वरूपं फलसंबंधश्चेति श्रूयमाणेनैव विधिना विधातव्यमिति द्वयोर्गौरवलक्षणो वाक्यभेदः यथाहुः श्रौतव्यापारनानात्वे शब्दानामतिगौरवं एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यत इति न च सोमेन यजेतेत्यस्योत्पत्तिविधित्वे यद्यपि न वाक्यभेदः तथापि मत्वर्थलक्षणा स्यादेवेति वाच्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्या·मी· म्॥ तस्याः स्वीक्रियमाणत्वात् लक्षणातो वाक्यभेदस्य जघन्यत्वात् लक्षणा हि पददोषो वाक्यभेदस्तु वाक्यदोषः पदवाक्यदोषयोर्मध्ये पदए
५ वदोषकल्पनाया उचितत्वात् गुणत्वन्याय्यकल्पनेति न्यायात् अत एव जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्यत्राधानानुवादेन जातपुत्रत्वकृष्ण
केशत्वविधाने वाक्यभेदात्परिहृयाभ्यामवस्थाविशेषो लक्ष्यत इत्युक्तम् तस्माद्वाक्यभेदप्रसक्तौ लक्षणैव स्वीकार्य्येति तस्मात्सोमेन यजेतेत्ययमेवोत्प
त्तिविधिर्न ज्योतिष्टोमेनेत्ययम् गौरवलक्षणवाक्यभेदापत्तेः किंच सोमेन यजेतेत्यत्र यागविधाने श्रुत्यर्थविधानं स्यात् गुणविधाने तु वाक्यार्थविधा
नं तच्च श्रुत्यर्थविधाने संभवेऽयुक्तम् यथाहुः वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसंभव इति वाक्यार्थः पदान्तरार्थ इत्यर्थः ज्योतिष्टोमेनेत्यत्रापि
फलोद्देशेन यागस्यैव विधानान्न वाक्यार्थविधानम् तदुत्पत्तिविधित्ववादिनापि तदंगीकाराच्च तस्मात् ज्योतिष्टोमेनेत्ययमधिकारविधिरेव अपि च क
र्मस्वरूपविधिस्तत्र स्वीकार्य्यो यत्र कर्मणो रूपमुपलभ्यते यागस्य च द्वे रूपे द्रव्यं देवता चेति सोमेन यजेतेत्यत्र यद्यपि देवता नोपलभ्यते सोमयाग
स्याव्यक्तत्वात् अव्यक्तत्वं च सार्थचोदितदेवताराहित्यम् न तु देवताराहित्यमात्रं ऐन्द्रवायवं गृह्णातीत्यादिवाक्यविहितग्रहणाङ्गदेवतानां सत्त्वात् ग्रहणा
र्थाभिरपि देवताभिः प्रसंगतो यागोपकारस्य स्वीक्रियमाणत्वात्। तथापि द्रव्यमुपलभ्यत एव तेनापि यागस्वरूपज्ञानं तु शक्यमेव ज्योतिष्टोमेन स्वर्गकामो
यजेतेत्यत्र च न द्रव्यं देवता वा श्रूयते अतस्तस्योत्पत्तिविधित्वेन यागविशेषज्ञानं यागसामान्यस्याविधेयत्वात् विशेषस्य च विधेयत्वादित्यादि
क्लेशेन स्यादतो नायं कर्मोत्पत्तिविधिः नन्वेवमपि अग्निहोत्रं जुहोतीत्ययमपि होमोत्पत्तिविधिर्न स्यात् रूपाश्रवणात् तच्छ्रवणाच्च दध्ना जुहो
तीत्ययमेवोत्पत्तिविधिः स्यात् तथा चाघाराग्निहोत्राधिकरणविरोधः तत्र हि अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं दध्ना जुहोतीत्यादीनां च गुण रा·भः
विधित्वमुक्तमिति चेत्सत्यम् अग्निहोत्रं जुहोतीत्यत्र यद्यपि रूपं नोपलभ्यते अग्निहोत्रशब्दस्य तत्प्रख्यन्यायेन नामधेयत्वात् तदेतदग्रे वक्ष्या ५

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मः तथापि तस्योत्पत्तिविधित्वं स्वीक्रियते अन्यथाऽनर्थक्यापत्तेः दध्ना जुहोतीत्यस्य वचनानर्थक्यं गुणविधित्वोपपत्तेः अत अग्निहोत्रं जुहोतीत्यस्य क
र्मोत्पत्तिविधिरिति युक्तम् ज्योतिष्टोमेनेत्यस्य वचनानर्थक्यमधिकारविधित्वोपपत्तेः अतः किमर्थं संभवति रूपवति वाक्ये कर्मविधाने तद्रहिते।
तत्स्वीकार्यं किंच दध्ना जुहोतीत्यस्य कर्मोत्पत्तिविधित्वे पयसा जुहोतीत्यनेन तत्कर्मानुवादेन न पयो विधातुं शक्यते उत्पत्तिशिष्टदध्यवरोधात् उ
त्पत्तिशिष्टगुणावरुद्धे हि न गुणान्तरं विधीयते आकांक्षाया उत्पत्तिशिष्टेनैव निवृत्तत्वात् अतस्तेनापि शिष्टं कर्मान्तरं विधेयं तथा चानेकादृष्ट
कल्पनागौरवम् अग्निहोत्रं जुहोतीत्यस्य तु उत्पत्तिविधित्वे एतद्वाक्यविहितस्य कर्मणो द्रव्याकांक्षायां युगपदेव खलेकपोतन्यायेन दध्ना जुहो
ति पयसा जुहोतीत्यादिवाक्यैर्गुणा विधीयंते इति नानेकादृष्टकल्पनागौरवम् अतोऽग्निहोत्रं जुहोतीत्ययमुत्पत्तिविधिः। पयसा जुहोतीत्यादय
स्तु गुणविधय इति युक्तं सोमेन यजेतेत्यत्र तु रूपवति वाक्ये कर्मोत्पत्तिविधाने स्वीक्रियमाणे न किंचिद्दूषणं पक्षद्वयेप्येकस्यादृष्टस्य तुल्यत्वात् तस्मा
द्युक्तम् सोमेन यजेतेत्ययमेवोत्पत्तिविधिरित्यलमनया विधिनिरूपणा—गतप्रपंचनिरूपणचिंतया प्रकृतमनुसरामः तत्सिद्धं विधिः प्रयोजनवं
तमप्राप्तार्थं विधत्ते इति॥ ❀ ॥ स च विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगश्चेति तत्र कर्मस्वरूपमात्रबोधको विधिरुत्प
त्तिविधिः यथाऽग्निहोत्रं जुहोतीति उत्पत्तिविधौ च कर्मणः करणत्वेनैवान्वयः होमेनेष्टं भावयेदिति न तु होमं कुर्यादिति साध्यत्वेन तथा सति साध्य
स्य साध्यान्तरान्वयायोगेनाधिकारवाक्यगतफलसंबंधो न स्यात् करणत्वेन तत्वन्वये होमेनेष्टं भावयेत् किं तदिष्टमित्याकांक्षायां फलविशेषसम्बन्धो घ
टते न चोत्पत्तिविधाविष्टवाचकपदाभावेन कर्मणाऽिष्टं भावयेदिति कथं वाक्यार्थ इति वाच्यम् विधिश्रुतेरेवेष्टबोधकत्वात् स हि पुरुषार्थे पुरुषं प्रवर्तयंती
कर्मणः फलसंबंधमात्रं बोधयति तस्माद्युक्तमुत्पत्तिविधौ कर्म करणत्वेनान्वेतीति अत एवोद्भिदा यजेतेत्यादौ तृतीयान्तः उद्भिच्छब्द उपपद्यते उद्भि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्या·मी· दायामेनेष्टं भावयेदित्यन्वयोपपत्तेः येषामपीष्टसाधनत्वं लिङर्थस्तेषामपि तृतीयांतानां कर्मनामधेयानामन्वयोऽनुपपन्न एव नहि संभवति या
६ गइष्टसाधनमुद्दिश्येति तृतीयोपात्तस्य कारकस्य लिंगसंख्यान्वयायोग्यस्य क्रिययैवान्वयात्। ननु तथाप्यग्निहोत्रं जुहोतीत्यादिषु कर्मोत्पत्ति
विधिषु द्वितीयान्तानां कर्मनामधेयानामन्वयोऽनुपपन्नः नहि संभवति होमेन भावयेदग्निहोत्रमिति सत्यं श्रूयमाणा तावद्द्वितीयाः स्वोक्षिप्तसा
ध्यत्वानुवादिका होमस्य हि करणत्वेनान्वयात् असाधितस्य करणत्वानुपपत्तेः तस्याश्चानन्वयोपस्थितौ सा सक्तून् जुहोतीतिवत्तृतीयार्थं लक्षय
ति अग्निहोत्रेण होमेनेष्टं भावयेदित्युक्तं पार्थसारथिमिश्रैः अतश्च द्वितीयांतानां कर्मनामधेयानामन्वयो नानुपपन्नः तत्सिद्धं उत्पत्ति विधौ
कर्मकरणत्वेनान्वेतीति ॥ ॐ ॥ अंगप्रधानसंबंधबोधको विधिर्विनियोगविधिः यथा दध्ना जुहोतीति स हि तृतीयाप्रतिपन्नांगभावस्य दध्नो होमसं
बंधं विधत्ते दध्ना होमं भावयेदिति एतस्य विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यारूपाणि एतत्सहकृतेन वि
नियोगविधिनांगत्वं परोद्देशप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते तत्र निरपेक्षो रवः श्रुतिः सा च त्रिविधा विधात्री अभिधात्री वि
नियोक्त्री चेति तत्र विधात्री लिङाद्यात्मिका अभिधात्री व्रीह्यादिश्रुतिः यस्य च शब्दस्य श्रवणादेव संबंधः प्रतीयते सा विनियोक्त्री सा च त्रिधा
विभक्तिरूपा एका समानाभिधानरूपा एका एकपदरूपा चेति तत्र विभक्तिश्रुत्यांगत्वं यथा व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागांगत्वं न चोत्पत्तिशि
ष्टपुरोडाशावरुद्धे यागे कथं व्रीहीणामंगत्वमिति वाच्यं पुरोडाशप्रकृतितयोपपत्तेः पशोरिव हृदयादिरूपहविःप्रकृतितया यागांगत्वम् ॥
न च साक्षात्पशोरेवांगत्वं किन्न स्यादिति वाच्यम् तस्य विशसनात् अवदीयमानत्वाच्च हृदयादीनाम् अवदीयमानं हि हविः यथा पुरोडाशा राम:
दि मध्यात्पूर्वार्द्धाच्चावद्यतीति वाक्यात् हृदयादीनि चावदीयमानानि न पशुः हृदयस्याग्रेऽवद्यतीति वाक्यादतो हृदयादीन्येव हवींषि पशुस्तु प्र ६

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतिद्रव्यम् पात्नीवद्यागे तु साक्षात्पशुरेवांगम् तस्य जीवत एव पर्यग्निकृतं पात्नीवंतमुत्सृजतीत्युत्सर्गविधानात् यत्र तु विशसनं तत्र पशुः
प्रकृतिद्रव्यमित्येव सिद्धं एवं व्रीहयोपि प्रकृतिद्रव्यतया यागांगम् तृतीयाश्रुत्येति आरुण्यस्यापि क्रयांगत्वम् तृतीयाश्रुत्या न चामूर्त्तस्य तस्य क्र
यं क्रयांगत्वमिति वाच्यम्। एकहायनीरूपद्रव्यपरिच्छेदद्वारा तदुपपत्तेः व्रीहीन्प्रोक्षतीति प्रोक्षणस्य व्रीह्यंगत्वं द्वितीयाश्रुत्या तच्च प्रोक्षणं न व्री
हिस्वरूपार्थं स्वरूपे आनर्थक्यात् व्रीहिस्वरूपस्य प्रोक्षणं विनानुपपत्त्यभावात् किंत्वपूर्वसाधनत्वप्रयुक्तं यदि व्रीहिषु प्रोक्षणं क्रियते तदा ते
यागे अनुष्ठिते ऽपूर्वं भवति नान्यथेति अतः प्रकरणसहकृतया द्वितीयाश्रुत्या तंडुलनिर्वृत्तिप्रणाड्या यदपूर्वसाधनत्वं तदंगत्वं प्रोक्षणस्योच्य
त इति एवं सर्वेष्वपि योगेषु अपूर्वप्रयुक्तत्वं वेदितव्यम्। एवमिमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्रापि द्वितीयाश्रुत्या मंत्रस्याश्वा
भिधान्यंगत्वं यत्तु वाक्यीयोयं विनियोग इति तन्न तथा सति वाक्याल्लिंगस्य बलीयस्त्वेन यावद्वाक्यादश्वाभिधान्यंगं भवति तावल्लिंगाद्रशनामात्रां
गत्वमेव स्यात् स्योनं ते सदनं कृणोमीत्यस्य सदनांगत्वम् श्रौतविनियोगपक्षे तु यावल्लिंगाद्रशनामात्रांगत्वं तावच्छ्रुत्या ऐंद्र्या गार्हपत्यमुपतिष्ठ
ते इत्यत्र तृतीयाश्रुत्या ऐंद्र्या ऋचः गार्हपत्योपस्थानांगत्ववत् अश्वाभिधान्यां विनियोगः क्रियत इति युक्तं मंत्रस्याश्वाभिधान्यंगत्वम् तस्माच्छ्रौ
त एवायं विनियोगः। यदाहवनीये जुहोतीत्याहवनीयस्य होमांगत्वं सप्तमीश्रुत्या एवमन्योपि विभक्तिश्रुत्या विनियोगो ज्ञेयः पशुना यजेतेत्यत्रैकत्वपु
स्त्वयोः समानाभिधानश्रुत्या कारकांगत्वं यजेतेत्याख्याताभिहितसंख्याया भावनांगत्वं समानाभिधानश्रुतेरेकपदश्रुत्या च यागांगत्वम् न चामूर्त्ता
याः तस्याः कथं यागांगत्वमिति वाच्यम् कर्तृपरिच्छेदद्वारा एतदुपपत्तेः कर्ता चाक्षेपलभ्य आख्यातेन हि भावनोच्यते सा च कर्त्तारं विनानुपपन्ना
तमाक्षिपति ननु किमित्येवं वर्ण्यते आक्षेपलभ्यः कर्तेति आख्यातवाच्य एव किन्न स्यात् आख्यातश्रवणे भावनाया इव कर्त्तुरपि प्रतिपत्तेः। न च

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावनयैवाक्षेपसंभवेकिमिति तद्वाचकत्वंकल्पनीयमितिसांप्रतम् तथासति आख्यातवाच्यकर्त्रैव भावनाक्षेपसंभवेतद्वाचकत्वमपिनस्यात्
किंचभावनायानकेवलंकर्त्रैवसंबधःकारकान्तरेणापिसंबंधात् अतःसानझटितिकर्त्तारमेवाक्षिपेत् विशेषाभावात्। कर्त्तातुभावनयैवसं
बद्धोनकारकांतरेणगुणानांचपरार्थत्वादसंबंधःसमत्वात्स्यादितिन्यायात् अतःसझटितितामेवक्षेपेत् इतिसएवाख्यातवाच्यः भावनातुआ
क्षेपलभ्यैवकिन्नस्यात्किंचैवंतृतीयादिविभक्तीनामपिकरणादिवाचकत्वंनस्यात्तेषामपिकर्त्तृवदाक्षेपलाभसंभवात् किंचयदिकर्त्तानवाच्यः
स्यात्कथमेकत्वंतेनान्वियात्नहिशाब्दमशाब्देनान्वेतीतियुक्तम् अन्यथा ऊहादिलोपप्रसंगः किंचदेवदत्तः पचतीतिसामानाधिकरण्यंनस्या
त् नहिकेवलंभावनावाचकस्याख्यातस्यदेवदत्तपदेनसामानाधिकरण्यमुपपद्यते एकार्थनिष्ठत्वाभावात् कर्त्तृवाचकत्वेतु पद्यतेएवलःकर्त्त
रीतिव्याकरणस्मृतिविरोधस्तुकर्त्तुरनभिधेयत्वेस्पष्टएवकिंचकर्त्तुरनभिधेयत्वेदेवदत्तेनपचतीतिप्रयोगप्रसंगः तृतीयाहि अनभिहितयोःक
र्तृकरणयोर्विहिता आख्यातेनचकर्त्तानाभिहित इति कर्त्तृवाचिनीतृतीयास्यात्देवकर्त्तुरभिधानेतु अभिहितत्वाद्देवत्तृतीयानप्राप्नोतितस्याअ
नभिहिताधिकारत्वात् देवदत्तःपचतीतिप्रथमातुप्राप्नोत्येवप्रथमायाअभिहितकारकविभक्तित्वात् प्रातिपदिकार्थमात्रवाचित्वाद्वानचतद्वाप्रा
तिपदिकेनैवार्थस्योक्तत्वात्प्रथमावैयर्थ्यम् लिंगसंख्याप्रतिपत्त्यर्थंतस्या आवश्यकत्वात् केवलप्रातिपदिकस्यप्रयोगासाधुत्वाच्चतत्स्वयदिक
र्त्तानवाच्यःस्याद्देवदत्तेनपचतीतिप्रयोगःस्यात् तस्मादाख्यातवाच्यः कर्त्तेतिसिद्धमिति पूर्वपक्षसंक्षेपः अत्राहुःसएवहिशब्दस्यार्थोयःप्रका
रान्तरेणानलभ्यते अनन्यलभ्यःशब्दार्थइतिन्यायात् अतएवनगंगापदस्यतीरमर्थःलक्षणयैवप्रतिपत्तिसंभवात् अतएवचनवाक्यार्थेशक्तिः
एवंचाख्यातवाच्यभावनाकर्त्तारंविनाऽनुपपन्नत्तमाक्षिपतीति आक्षेपादेवकर्त्तुःप्रतिपत्तिसंभवेकिमितितद्वाचकत्वमाख्यातस्यकल्पनीयम्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नच विनिगमनाविरहः कृतिमान् हि कर्त्ता एवं च कृतेरेव भावनापरपर्य्यायाः आकृत्यधिकरणन्यायेनाख्यातवाच्यत्वसंभवेन तद्वतः कर्त्तुर्वाच्यत्वं
कल्पनीयं गौरवप्रसंगात् नच भावनाकारकांतरेणापि संबद्धा तद्भिन्नत्वान्न वृत्तिकर्त्तारमाक्षिपतीति वाच्यम् साहि यथा नियमेन कर्त्रा संबद्धा
न तथा करणादिकारकान्तरेण तिष्ठतीत्यादिषु तया तदनाक्षेपात् अतः प्रथमं सा कर्त्तारमेवाक्षिपति न कारकान्तरम् अतएव चाख्याताभिहित
संख्या न कारकान्तरेण संबध्यते तस्य प्रथममनुपस्थितेः तत एव तृतीयादिविभक्तीनां करणादिवाचित्वम् भावनायास्तैः सह नियतसंबधाभावे
———————— न तया तेषां नियमेनानाक्षेपात् आख्यातश्रवणात्प्रागपि तृतीयादिविभक्तिश्रवणे करणादिप्रतीतेर्जायमानत्वाच्च नचया
वदीसंख्या कथम शाब्देन कर्त्रान्वेतीति वाच्यम् कर्तुर्लक्षणांगीकारात् यथा च लक्षितं तीरं शाब्देन घोषेणान्वेति एवं लक्षितः कर्त्ता एकत्वेनान्वे
ष्यति अतएव देवदत्तः पचतीति सामानाधिकरण्यमुपपद्यते कर्तुर्लक्षणांगीकारात्॥ नच मुख्ये संभवति किमिति लाक्षणिकत्वं स्वीकार्यमिति
वाच्यम् अनन्यलभ्यशब्दार्थत्वस्य व्यवस्थापितत्वात् अन्यथा सिंहो देवदत्त इति सामानाधिकरण्यं मुख्यं स्यात् किंच आख्यातवाच्यः कर्त्तेति वा
दिनोपि मते देवदत्तः पचतीति सामानाधिकरण्यं न मुख्यम् तन्मते आख्यातेन तृतीयावन्निष्कृष्टशक्तिमात्ररूपकर्तृकारकाभिधानात् शक्ति
मद्द्रव्यस्याकृत्यधिकरणन्यायेनानभिधानात् देवदत्तशब्देन च द्रव्यमात्राभिधानात् अतश्च भिन्नार्थनिष्ठत्वात्तन्मतेपि न मुख्यं सामानाधिकर
ण्यं किंतु लाक्षणिकमेवेति न कश्चिद्विशेषः नच लः कर्त्तरीति व्याकरणस्मृतिबलादाख्यातवाच्यः कर्त्तेति वाच्यम् नहि वाच्यवाचकभावो व्याकरण
स्मृत्यधीनः तस्य न्यायसहितान्वयव्यतिरेकगम्यत्वात् भवतु वा स्मृतिगम्यत्वात् भवतु वा स्मृतिगम्यस्तथापि नेयं स्मृतिः कर्त्तुराख्यातवाच्यत्वे प्रमाणं किं
तु कर्तुरेकत्वे एकवचनात्मको लकारः द्वित्वे द्विवचनात्मकः बहुत्वे बहुवचनात्मक इत्यस्मिन्नर्थे प्रमाणं द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवच

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमित्यनेनास्याः स्मृतेरेकवाक्यत्वात् यत्तूक्तं कर्तुरनभिधाने देवदत्तेन पच्यतीति तृतीयाप्रसंग इति तन्न तृतीया हि कर्तृप्रतिपत्त्यर्थं तद्गतसं
ख्याप्रतिपत्त्यर्थं वा तत्र कर्त्ता तु भावनाक्षेपादेव लभ्यत इति न तत्र तृतीयापेक्षा तत्संख्या तु आख्यातेनैव प्रतीयत इति न तत्राप्यपेक्षा यथाहुः सं
ख्यायां कारके वा धीर्विभक्त्या हि प्रवर्त्तते उभयं चात्र तत्सिद्धं भावनातिङ्विभक्तित इति यत्र तु नाख्यातेन तद्गतासंख्योच्यते तत्र भवत्येव तृतीया यथ
या देवदत्तेन ओदनः पच्यत इति तस्मान्न कर्तुरनभिधाने यत्किंचिद्दूषणमित्यलमतिविस्तरेण प्रकृतमनुसरामः तत्सिद्धस्त्रिविधः श्रुतिविनियो
गः से यं श्रुतिर्लिंगादिभ्यः प्रबलं प्रमाणं लिंगादिषु हि न प्रत्यक्षो विनियोजकः शब्दोऽस्ति किंतु कल्प्यः यावच्च तैर्विनियोजकः कल्प्यते तावत्प्रत्यक्षया श्रु
सा विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तिर्विहन्यत इति श्रुतेः प्राबल्यमत एव ऐंद्र्या गार्हपत्यमुपतिष्ठत इत्यत्र यावल्लिंगात् ऐंद्र्या इन्द्रोपस्था
नांगत्वं कल्प्यते तावत्प्रत्यक्षया श्रुत्या गार्हपत्योपस्थानार्थत्वं क्रियत इति ऐंद्री गार्हपत्योपस्थानांगम् ॥ ःः ॥ सामर्थ्यं लिंगम् । यदाहुः सामर्थ्यं स
र्वभावानां लिंगमित्यभिधीयत इति तेनांगत्वं यथा बर्हिर्देवसदनं दामीत्यस्य लवनांगत्वं स हि लवनं प्रकाशयितुं समर्थः तच्च लिंगं द्विविधम् सामा
न्यसंबंधबोधकप्रमाणान्तरापेक्षं तदनपेक्षं च तत्र यदंतरेण यन्न संभवत्येव तस्य तदंगत्वम् तदनपेक्षं केवललिंगादेव यथा पदार्थज्ञानस्य कर्मा
नुष्ठानांगत्वम् नहि अर्थज्ञानमंतरेणानुष्ठानं संभवति यदंतरेण यत्संभवति तस्य तदर्थत्वं तदपेक्षं यथोक्तस्य मंत्रस्य लवनांगत्वम् लवनं हि मंत्रं वि
नापि उपायांतरेण स्मृत्वा कर्तुं शक्यमतो न मंत्रो लवनस्वरूपार्थः संभवति किंत्वपूर्वसाधनीभूतलवनप्रकाशनार्थः तत्त्वं च न सामर्थ्यमात्रादवगम्य
ते लवनप्रकाशनमात्रे सामर्थ्यात् अतोऽवश्यं प्रकरणादि सामान्यसंबंधबोधकं स्वीकार्यम् दर्शपूर्णमासप्रकरणे हि मंत्रस्य पाठादेवमवगम्य
ते अनेन मंत्रेण दर्शपूर्णमासापूर्वसंबंधि किंचित्प्रकाश्यत इति अन्यथा प्रकरणपाठवैयर्थ्यप्रसंगात् किं तदपूर्वसंबंधिप्रकाश्यमित्यपेक्षायां सा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मर्थ्याद्बर्हिर्लवनमित्यवगम्यते तद्धि बर्हिः संस्कारद्वाराऽपूर्वसंबंधीति मंत्रस्य सामर्थ्यात्तदर्थत्वे सति नानर्थक्यं प्रसज्यते तस्माद्बर्हिर्देवसदनं दामीत्य
स्य प्रकरणाद्दर्शपूर्णमाससंबंधितयावगतस्य सामर्थ्याल्लवनाङ्गत्वमिति सिद्धम् पूषानुमंत्रणमंत्राणां तु यागानुमंत्रणसमाख्यया यागसामा
न्यसंबंधेवगते सामर्थ्यात्पूषयागसंबंधोवगम्यते। ननु तेषां यावत्समाख्यया पूषयागेन सामान्यसम्बन्धोवगम्यते तावत् प्रकरणाद्दर्शपूर्ण
मासाभ्यामेव सामान्यसम्बन्धोऽवगतः समाख्यातस्तस्य वलीयस्त्वात्। अतएव पौरोडाशिकमिति समाख्याते ब्राह्मणे आम्नातानामपि प्रया
जानां प्रकरणात्सान्नाय्योपांशुयागांगत्वमपीत्युक्तम्। किं च यागानुमंत्रणसमाख्ययापि न पूषयागेन सामान्यसंबंधोवगम्यते किंतु यागमात्रे
ण प्रकरणेन तु दर्शपूर्णमासाभ्यामेव विशेषेण सम्बन्धोवगम्यते अतः प्रकरणात् झटिति तत्संबंधस्यैवावगतत्वात्तदर्थत्वमेव तेषां युक्तम् पूषे
ति शब्दस्य पुषतीति श्रुतस्याकथंचिदग्न्याद्यभिधायित्वान्नैवम्। पूषानुमंत्रणमंत्रे हि श्रूयमाणे एवमवगम्यते पूषाभिधानसमर्थत्वादयं मंत्रस्त
त्प्रकाशनार्थ इति लवनमंत्र इव लवनप्रकाशनार्थः। न तत्र प्रकरणाद्यपेक्षा येन तेषामुपजीव्यत्वेन प्राबल्यं स्यात् प्रकरणात्तु दर्शपूर्णमासार्थत्वे
तस्य वाक्यलिंगश्रुतिकल्पनेन विनियोजकत्वात् लिंगस्योपजीव्यत्वेन प्राबल्यं अतो लिंगात्पूषप्रकाशनार्थत्वेऽवगते तन्मात्रप्रकाशनमनर्थक
मित्यपूर्वप्रकाशनार्थत्वं वक्तव्यं किं तदपूर्वमित्यपेक्षायां यागानुमंत्रणसमाख्यानुगृहीताल्लिंगात्पूषयागापूर्वसंबंधिदेवताप्रकाशनार्थोयमि
त्यवगम्यते. अतो यद्यपि समाख्यातः प्रकरणं वलीयस्तथापि तस्य लिंगेन बाधितत्वात् समाख्याया दुर्वलाया अपि लिंगाश्रितत्वेन प्राबल्यात्से
व सामान्यसंबंधे प्रमाणं दुर्बलस्य प्रबलाश्रितस्य प्राबल्यात् अतएव श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलपदार्थाश्रितत्वेन प्रा
वल्यात्पदार्थधर्मगुणभूतश्रौतक्रमत्यागेन वेदिकरणानन्तरं क्षुते आचमनमेव कार्यमित्युक्तं यथाहुः अत्यंतबलवंतोपि पौरजानपदा जनाः दु

CC-0. Gurukul Kangri Collection, Haridwar

न्या॰मी॰ वैलैरपि बाध्यंते पुरुषैः पार्थिवाग्निते रिति यत्तु पूषेति शब्दः कथंचिदग्न्याद्यभिधायीति तन्न तस्यादंतको हि स इत्यादिवाक्यशेषेण वैदिकप्रसिध्या
९ च अर्थविशेषे रूढत्वात् रूढेश्चावयवार्थालोचनसव्यपेक्षाद्योगाद्बलीयस्त्वात् अत एव वर्षासु रथकारोऽग्नीनादधीतेत्यत्र रथकारशब्देन सौध
न्वनापरपर्य्यायो वर्णविशेष उच्यते रूढिः प्राबल्यान्न तु रथं करोतीति व्युत्पत्त्या द्विजातयः योगस्य दौर्बल्यादित्युक्तम् षष्ठे तस्माद्युक्तं समाख्यायाः सा
मान्यसंबन्धे वगमे सामर्थ्यात् पूषयागसम्बन्धः पूषानुमंत्रणमंत्राणामिति यथाहुः यागानुमंत्रणानीति समाख्या क्रतुयोजिका तस्मात् शक्त्यनुरोधेन
प्राप्तिस्तु दैवतेकता वितितत्सिद्धं प्रमाणांतरसिद्धसामान्यसम्बन्धस्य पदार्थेति नियोजकं लिंगमिति तत्र मंत्रविनियोजकं लिंगं मुख्येनैवार्थेन गौणेमु
ख्यार्थस्य प्रथममुपस्थितत्वेन तत्रैव विनियोगबुद्धौ पर्य्यवसन्नायां पुनर्गौणेऽर्थे विनियोगकल्पनायां गौरवप्रसंगात् अत एव बर्हिर्देवसदनंदा
मीति मंत्रः सामर्थ्यात्कुशलवनांगं तेषां मुख्यत्वात् न उलपराजिलवनांगमित्युक्तम् तदिदं लिंगं वाक्यादिभ्यो बलवत् तेषां हि न सा स्या हि नियोज
कत्वं किंतु श्रुतिं कल्पयित्वा न चासमर्थस्य श्रुतिं कल्पयित्वा विनियोगकल्पना संभवतीति सामर्थ्यस्यापि कल्प्यत्वेनोपजीव्यत्वात् अतस्तैर्यावत्साम
र्थ्यं कल्पयित्वा श्रुतिः कल्प्यते तावदेव क्लृप्तेन सामर्थ्येन श्रुतिं कल्पयित्वा विनियोगः क्रियत इति तस्य प्राबल्यम् अत एव स्योनं ते सदनं कृणोमि घृतस्य
धारया सुशेवं कल्पयामीत्यस्य सदनांगत्वं लिंगात् न तु वाक्यात्सदनांगत्वं तस्य दौर्बल्यादिति समभिव्याहारो वाक्यम् समभिव्याहारो नाम साध्यसाध
नत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणं यथा यस्य पर्णमयी जुहूर्भवतीति अत्र हि न द्वितीयादिविभक्तिः श्रूयते केवलं पर्णता
जुह्वोः समभिव्याहारमात्रम् तस्मादेव च पर्णताया जुह्वंगत्वं न चानर्थक्यं जुहूशब्देनापूर्वलक्षणात् तदयं वाक्यार्थः पर्णतया अवत्तहविर्द्धारणद्वारा रामः
परपूर्वसाधनं तद्भावयेदिति एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यम् अवत्तहविर्द्धा ९

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रणाद्वारेतिचावश्यंवक्तव्यम् अन्यथास्तुवादिष्वपिपर्णतापत्तेः साचेयंपर्णतानारभ्याधीतानसर्वत्रक्रतुषुगच्छतिविकृतिषु चोदकेनापिप्राप्ति
संभवेनद्विरुक्तत्वापत्तेः किंतुप्रकृतिषुतदुक्तं प्रकृतौवाद्विरुक्तत्वादिति अत्रविकृतिर्यतोंगानिगृह्णातिसाप्रकृतिरितिनप्रकृतिशब्देनविवक्षि
तंगृहमेधीयपर्णतायाअप्राप्तिप्रसंगात् नहिगृहमेधीयात्काचनविकृतिरंगानिगृह्णातिमानाभावात् किंतुचोदकाद्यत्रांगाप्राप्तिस्तत्कर्मप्रकृ
तिशब्देनविवक्षितम् यथादर्शपूर्णमासौतत्रहीनचोदकादंगप्राप्तिः प्रकरणपठितैरेवांगैर्नैराकांक्षात् गृहमेधीयादिष्वपिनचोदकादंगप्राप्तिः
कॢप्तोपकारैरेवआज्यभागादिभिर्नैराकांक्षात् अतोयत्रचोदकाप्रवृत्तिस्तत्रानारभ्याधीतानांसन्निवेशः साप्तदश्यंत्वनारभ्याधीतमपिनप्रकृतौ
गच्छतिप्रकृतेः पांचदश्यावरोधात् किन्तुविकृतिषुगच्छति तत्रापिनसर्वासुगच्छतिचोदकप्राप्तपांच—— दश्यबाधप्रसंगात् किंतुप्रत्यक्षश्रुति
साप्तदश्यासुमित्रविंदादिषुगच्छति यथाह एवंचप्रकृतावेतत्पांचदश्यंप्रतिष्ठितं विकृतौचनयत्रास्तिसाप्तदश्यपुनःश्रुतिरिति · नचवाक्यवैय
र्थ्य अनारभ्याधीतस्यैवसाप्तदश्यस्यमित्रविंदादिप्रकरणस्थेनवाक्येनोपसंहारात् · उपसंहारोनामसामान्यप्राप्तस्यविशेषेनियमनं यथाहुःसा
मानविधिरस्पष्टःसंह्रियेतविशेषतइति तत्रानारभ्यविधिः सामान्यविधिः मित्रविंदादिप्रकरणस्थस्तुविशेषविधिरित्यास्तांतावत् प्रकृतमनुसरामः
तत्सिद्धंवाक्यादंगत्वंतद्धिवाक्यंप्रकरणाद्बलीयः प्रकरणंहिनसाक्षाद्विनियोजकं तद्धिआकांक्षारूपं · नचाकांक्षास्वयंप्रमाणं · किन्तु · साकांक्षंवाक्यं
दृष्ट्वाभवत्येतादृशीमतिः नूनमिदंवाक्यंकेनचिद्वाक्येनैकवाक्यभूतमिति · ततश्चाकांक्षारूपंप्रकरणंवाक्यस्यवाक्यांतरैकवाक्यत्वेप्रमाणं · एवंचया
वत्प्रकरणंवाक्यंकल्पयित्वाविनियोजकंभवतिइतिप्रकरणाद्वाक्यंबलीयः अतएवैंद्राग्नीइदंहविरजुषेतामवीवृधेतांमहोज्यायोक्रातामित्यत्रैंद्रा
ग्नीपदस्यलिंगाद्दर्शांगत्वेसिद्धेइदंहविरित्यादेरपितदेकवाक्याद्दर्शांगत्वंनतुप्रकरणाद्दर्शपूर्णमासांगत्वंप्रकरणाद्वाक्यस्यबलीयस्त्वादिति · उभ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यकांक्षाप्रकरणं॰ यथा प्रयाजादिषु समिधो यजतीत्यत्र हि इष्टविशेषस्यानिर्देशात्समिद्यागेन भावयेत्किमित्यस्त्युपकार्याकांक्षा दर्शपूर्णमासा
भ्यां स्वर्गकामो यजेतेति त्वत्र दर्शपूर्णमासयागैः स्वर्गं कुर्यात् कथमित्यस्त्युपकारकांक्षेत्यु—————उपकार्योपकारकाकांक्षारूपोभयाकांक्षा
लक्षणप्रकरणेन प्रयाजानां दर्शपूर्णमासांगत्वं सिद्ध्यति॰ ननु यदि प्रयाजादिवाक्ये इष्टविशेषो न श्रूयते तर्हि विश्वजिन्न्यायेन स्वर्गः फलं कल्पतां
विश्वजिदधिकरणे हि विश्वजिता यजेतेत्यत्र फलस्याश्रवणात्फलमंतरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये सर्वाभिलषितत्वेन स्वर्गः
फलमित्युक्तं तदुक्तं स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात् इति रात्रिसत्रन्यायेनार्थवादिकं वा फलं कल्पतां रात्रिसत्राधिकरणे हि प्रतितिष्ठंति ह वे य
एता रात्रीरुपयंतीत्यत्र विध्युद्देशे फलाश्रवणात्फलमंतरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये॰ आर्थवादिकं प्रतिष्ठाख्यं फलमित्यु
क्तं॰ विश्वजिदधिकरणन्यायेनानुपस्थितस्वर्गकल्पने तस्य प्रकृतसंबंधकल्पने गौरवादर्थवादोपस्थितस्यैव प्रकृतफलत्वकल्पने लाघवात्
तदुक्तं॰ फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यादिति॰ तस्माद्विश्वजिन्न्यायेन रात्रिसत्रन्यायेन वा स्वतंत्रफलार्थत्वे संभवति किमिति दर्शपू
र्णमासांगत्वं स्वीक्रियत इति चेन्मैवं॰ स्वतंत्रफलार्थत्वे अन्यतराकांक्षया संबंधः स्यात्॰ न ह्यत्र फलत्वे साधनाकांक्षास्ति॰ श्रूयमाणं हि फलं
साधनमाक्षिपति॰ न चात्र तच्छ्रूयते॰ एवं च फलस्याकांक्षाभावात्केवलं किं भावयेदिति॰ प्रयाजानां भाव्याकांक्षयैव स्वतंत्रफलार्थत्वं स्यात्॰ दर्शपूर्णमा
सार्थत्वे तु भयाकांक्षा प्रमाणं प्रयाजानां भाव्याकांक्षायाः इतरत्र कथंभावाकांक्षायाः सत्वात् अन्यतराकांक्षातश्चोभयाकांक्षा बलीयसीति वक्ष्यते॰ तत
श्च दर्शपूर्णमासार्थत्वमेव युक्तं न स्वतंत्रफलार्थत्वमिति॰ तदुक्तं द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति अत्र द्रव्ये फलश्रुतिर्यस्य
पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमाद्या संस्कारे फलश्रुतिर्यदांक्ते चक्षुरेव भ्रातृव्यस्य वृंक्ते इत्येवमाद्या कर्मणि फलश्रुतिर्वर्म वा ए

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्यज्ञस्य क्रियते यत्प्रयाजाद्युज्यं तदित्याद्याः कर्मपदं चारादुपकारककर्मपरं दृष्टं संस्कारात्कर्मणः श्यक्य कीर्त्तनात् इत्यास्तां तावत् तदिदं प्रक
रणं क्रियाया एव विनियोजकं न द्रव्यगुणयोः तयोस्तु क्रियायोगाद्धि नियोजकं कुत इति चेत् शृणु यजेत स्वर्गकाम इत्यत्राख्यातांशेनार्थी भावनोच्य
ते भावयेदिति सा चांशत्रयमपेक्षते किं भावयेत्कथं भावयेदिति तत्र भाव्याकांक्षायां षष्ठाद्यन्यायेन स्वर्गो भाव्यतयान्वेति स्वर्गं भावयेदिति करणा
कांक्षायां समानपदोपात्तो यागो भावार्थाधिकरणन्यायेन करणतयान्वेति यागेन स्वर्गं भावयेदिति ततः कथमिति कथंभावाकांक्षा जायते· तस्यां चा
कांक्षायां यत्सन्निधौ पठितमश्रूयमाणफलकं च क्रियाजातं तदेवोपकार्याकांक्षया इतिकर्तव्यतात्वेनान्वयमनुभवितुं योग्यं क्रियाया एव लोके कथं
भावाकांक्षायामन्वयदर्शनात्· नहि कुठारेण भिंद्यादित्यत्र कथमित्याकांक्षायां हस्त इति केवलमुच्चार्यमाणोपि हस्तोन्वयं प्राप्नोति· किं तर्हि हस्तेनोद्य
म्यनिपात्येत्युच्चार्यमाणे उद्यमननियमन एव हस्तोपि तद्द्वारेणैवान्वयं प्राप्नोति सर्वजनीनमेतत् किं च कथंभावाकांक्षानाम करणगतप्रकाराकां
क्षा कथमः प्रकारवाचित्वात् सामान्यस्य च भेदको विशेषः प्रकारः सामान्यं च क्रियारूपमेवाख्यातेनोच्यते· यजेत स्वर्गकाम इत्यस्य हि अयमर्थः
यागेन तथा कुर्याद्यथा यागात्स्वर्गो भवति इति· क्रियासामान्यस्य च विशेषः क्रियैव भवति· नहि ब्राह्मणविशेषः परिव्राजकादिरब्राह्मणो भवति· एवं
च करणगत क्रियाविशेषाकांक्षापरनामधेयकथंभावाकांक्षायां क्रियैवान्वेतीति युक्तं· स च करणगतः क्रियाविशेषोन्वाधानादि ब्राह्मणतर्प
णांतः क्रियारूप एवेति युक्तं· तस्य प्रकरणेन ग्रहणं तस्य च करणगतत्वं करणोपकारकत्वमेव तेन विना यागेनापूर्वाजननात्· नह्युद्यमननिप
तनव्यतिरेकेण कुठारेण द्वैधीभावो जन्यते तत्सिद्धं कथंभावाकांक्षायां क्रियैवान्वेतीति· अत एव द्रव्यदेवतयोर्यागसंपादनद्वारान्वयः सांप्रदाय
कैरुक्तः विकृतौ च कथंभावाकांक्षायामुपकारकसंपादनमतिदिश्यत इत्युक्तं· यदि च कथंभावाकांक्षायां सिद्धं वस्तु अन्वययोग्यं स्यात्· तदा उ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पकार्य्यसंपादनपर्य्यंतंधावनंग्रंथकाराणामनर्थकंस्यात्·अतःक्रियाया एव इतिकर्त्तव्यंकथंभावाकांक्षागृहीतस्येतिकर्त्तव्यतात्वात् इतिशब्द
स्यप्रकारवाच्यत्वात् कर्त्तव्यस्येतिप्रकार इतिकर्त्तव्यता प्रकारश्चसामान्यस्य भेदको विशेष इत्युक्तंकर्त्तव्यस्यविशेषः कर्त्तव्यएवभवतीतिन
सिद्धस्यवस्तुनोइतिकर्त्तव्यतात्वं·किंतु·क्रियायाएवसिद्धस्यतुद्रव्यादेःकेवलमंगत्वं तदपिश्रुत्यादिनाननुप्रकरणात् यथाहुःनावांतरक्रियायो
गादृतेवाक्यापकल्पितात् गुणद्रव्येकथंभावैर्गृह्णंति प्रकृताःक्रियाइति अतएव वर्हिर्देवसदनंदामीत्यादिमंत्राणांलिंगादंगत्वंनतुप्रकर
णादित्युक्तं अर्थवादाधिकरणपूर्वपक्षसमाप्तौराणकेक्वचित्तुद्रव्यस्येतिकर्त्तव्यतात्वाभिधानमंगत्वाभिप्रायंद्रष्टव्यंवहुग्रंथस्वरसादुक्तयुक्तेश्चे
तितत्सिद्धंप्रकरणंक्रियायाएवविनियोजकं तच्च प्रकरणंद्विविधंमहाप्रकरणमवांतरप्रकरणंचेति फलभावनायाःप्रकरणंमहाप्रकरणम् ॥
तच्चप्रयाजानांग्राहकं तच्चप्रकृतावेवयत्रसमग्रांगोपदेशःसाप्रकृतिः यथादर्शपूर्णमासादिः तत्रैवोभयाकांक्षारूपंप्रकरणंसंभवतीत्याकांक्षा
नुपरमात् विकृतौतुनप्रकरणंसंभवतीति यत्रनसमग्रांगोपदेशःसाविकृतिः यथाशौर्यादिः तत्रयान्यपूर्वाण्यंगानिपठ्यंते उपहोमादिनि
तेषांनप्रकरणंविनियोजकं तत्रयद्यपितेषांकिंभावयेदित्यस्त्याकांक्षातथापिनप्रधानस्यकथंभावाकांक्षास्तिप्राकृतैरेवांगैर्निराकांक्षत्वात्· न
चप्राकृतानामंगानामत्रापठितत्वेनाप्रत्यक्षत्वाद्वैकृतानांतुपठितत्वेनप्रत्यक्षत्वात्तैरेवाकांक्षोपशम इतिवाच्यं तेषांपठितत्वेपिअकृतोपकार
कत्वेनरूढित्याकांक्षोपशमनेऽसामर्थ्यात्·प्राकृतानांतुकॢप्तोपकारकत्वेनतच्छमनेसामर्थ्यात् नचात्रतेषामुपस्थापकाभावः उपमितिलक्षण
प्रमाणेनतेषामुपस्थितत्वात् सौर्यवाक्येहिदृष्टेऔषधद्रव्यत्वेनएकदैवत्यत्वेनचसादृश्येनआग्नेयवाक्यमुपमीयते·गवयदर्शनाद्गोरुपमान
वत्·तस्मिंश्चोपमितेतेनतदर्थोज्ञायतेसचत्र्यंशाभावनातत्रशौर्यवाक्यभावनायाभाव्यकरणयोः सत्वात् इतिकर्त्तव्यताकांक्षायांउपकारप्रष्ट

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावेनाग्नेयेनेतिकर्त्तव्यतातिदिश्यते सौर्ययागे न ब्रह्मवर्चसंभावयेदाग्नेयवत्सूर्याचतयैवाकांक्षोपरमान्नविकृतेः प्रकरणमस्ति अन्यतरा
कांक्षारूपस्थानादेवचापूर्वांगग्रहणं· नचप्राकृतांगग्रहणमेव विकृतौ प्रकरणात्किंनस्यादितिवाच्यं· तेषामपिप्रकृत्युपकारकतयाकांक्षोप
शमात्· ननुप्राकृतानामंगानामाकांक्षाभावे तेषांविकृतिसंबंधः केवलंस्थानात्स्यात्· अपूर्वाणांत्वाकांक्षासत्वाद्विकृतेरप्याकांक्षावत्वात्तेषांत
त्संबंधः प्रकरणात्स्यात् प्रकरणंचस्थानात्झटितिविनियोजकमिति अपूर्वाणामेवप्रथमंसंबधःपश्चात्प्राकृतानामिति· उच्यते· सत्यंप्रकरणं
झटितिविनियोजकं तथापिप्रमाणबलात्· प्रमेयबलस्यज्यायस्त्वात् उक्तविधयोपस्थितानांप्राकृतानामेवसंबंधोयुक्तः प्रथमंप्रकृतौक्लृप्तो
पकारत्वात् नवैकृतानांकल्प्योपकारत्वात्· विकृतेश्चोपकारकपदार्थाकांक्षा नपदार्थमात्राणामितियुक्तः प्रथमंप्राकृतानांगसंबंधः ततश्च
नविकृतौप्रकरणंविनियोजकं· यत्तुविकृतौप्राकृतांगानुवादेनविधीयते यथौदुंबरोयूपोभवतीतियूपानुवादेनौदुंबरत्वंतत्प्रकरणाद्गृह्यतेन
नुतत्प्रकरणाद्गृह्यते अक्रियात्वात् क्रियायाएवप्रकरणग्राह्यत्वादिति चेत्सत्यं तथापितावद्विधीयमानस्यऔदुंबरत्वस्याप्यवाकांक्षा किं
भावयेदिति नचयूपानुवादेनतस्यविधीयमानत्वात् यूपस्यचादृष्टरूपत्वात्तेनैवौदुंबरत्वस्यनैराकांक्ष्यं आहवनीयेनेवाधानस्येतिवाच्यं·
यूपस्यकेवलादृष्टरूपत्वाभावात् तस्यच तद्रूपत्वेखादिरत्वादिकं केवलादृष्टार्थंस्यात्· नचतत्संभवति तथासतिखादिराभावेप्रतिनिधित्वे
नकदरोपादानं नस्यात्· अदृष्टार्थस्यप्रतिनिध्यभावात् नहिखदिरजन्यमदृष्टंकदरेणक्रियते इत्यत्रप्रमाणमस्ति अतएवनादृष्टार्थानांप्र
तिनिधिः तदुक्तंनदेवताग्निशब्दक्रियमन्यार्थत्वादिति निधित्वेनचोपादानंकदरादेरुक्तंग्रंथेषु तस्मान्नयूपस्यकेवलादृष्टरूपत्वं अपितुदृष्टा
दृष्टसंस्कारगुणीयूपइतिसांप्रदायिकाः एवंच औदुंबरत्वस्यनयूपमात्रेणनैराकांक्ष्यंदृष्टसंस्कारस्यप्रकारांतरेणासंभवात्· अतश्चास्ति औदुंब

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु दध्यन्वयमात्रेण निवर्त्तते र

न्या॰मी॰ १२ रत्वस्याकांक्षा विकृतेरपि अस्ति कथंभावाकांक्षा साच तदोपशाम्यति यदोपकारास्तत्पृष्ठभावेन च पदार्था अन्वीयंते न तूपकारमात्रेणायेन शा
म्यति अतश्च यथेंद्रियभावनायाः करणाकांक्षा दध्नः करणत्वेनान्वये जाते सिद्धस्य करणत्वानुपपत्त्या होमस्याश्रयत्वेनान्वयो यावदनुवर्त्तते
आश्रयत्वेन च गृह्यमाणो होमः करणाकांक्षयैव गृह्यत इत्युक्तं न त्वाश्रयाकांक्षा नाम चतुर्थ्यस्ति एवं विकृतेः कथंभावाकांक्षा नोपकारान्व
यमात्रेण निवर्त्तते उपकारपृष्ठभावेन यावत्पदार्थान्वयमनुवर्त्तते अतश्चोपकारपृष्ठभावेन गृह्यमाणाः पदार्थाः कथंभावाकांक्षयैव गृह्य
ते तत्र प्राकृताः पदार्थाः कथंभावाकांक्षयैव गृह्यमाणा अपि न प्रकरणग्राह्याः प्रकृत्युपकारकतया तेषां आकांक्षाभावात् औदुंबरत्वादयस्तु
अन्यानुपकारतया साकांक्षाः पशुनियोजनयूपपृष्ठभावेन यावत् खादिरत्वमायाति तावद्विधीयंत इति युक्तं तेषां प्रकरणाद्ग्रहणं उभयाकांक्षा
सत्त्वात् यदि हि यूपपृष्ठभावेन खादिरत्वं विहितं स्यात् ततो विकृतेराकांक्षाभावादौदुंबरत्वेन प्रकरणग्राह्यं स्यात् नचैतद्युक्तं खादिरत्वा
विषयत्वात् ननु यदि यावत्खादिरत्वमायाति तावदेवौदुंबरत्वं विधीयते तदा तेन खादिरत्वबाधो अप्राप्तबाधः स्यात् तार्त्तीयबाधवत् तथा
हि बाधो द्विविधः अप्राप्तबाधः प्राप्तबाधश्चेति तत्र तार्त्तीयो बाधोऽप्राप्तबाधः तत्र हि यावद्बलवत्त्वेन प्रमाणेन विनियोगः कर्तुमारभ्यते तावदेव प्रब
लप्रमाणेन विनियोगः क्रियत इति तद्बाधितेनेतरबाधोऽप्राप्तबाधः दुर्बलप्रमाणस्याक्लृप्तत्वात् प्राकृतस्य त्वंगस्य विकृतौ चोदकप्राप्तस्य प्र
त्याम्नायादर्थलोपात्प्रतिषेधाद्वा यो बाधः स प्राप्तबाधः यथा प्राकृतीनां कुशानां प्रतिकूलशराम्नानात् यथा वावघातस्य कृष्णलेषु वैतुष्यरू
पप्रयोजनलोपात् यथा वा पित्र्येष्टौ होतृवरणस्य न होतारं वृणीत इति प्रतिषेधात् औदुंबरत्वेन च खादिरत्वबाधः प्राप्तबाध एव वक्तव्यः शर रा॰न॰
कुशन्यायेन चोदकस्य खादिरत्वाविषयत्वे प्राप्त्यभावात्तदनुपपत्तिः स्यादिति उच्यते तार्त्तीयप्रमाण विनियुक्तेनेतरस्य बाधनं तावदप्रा १२

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्तबाधनंप्रकरणंचतार्तीयंतेनतद्विनियुक्तौदुंबरत्वेनेतरबाधनमप्राप्तबाधएवनहिवैकृतेनप्राकृताबाधःप्राप्तबाधएवेतिकुलधर्मः वस्तुत
स्तुप्राप्तबाधएवायंनचस्वादिरत्वस्यचोदकाविषयत्वेनप्राप्त्यभावात् कथंतद्बाधःप्राप्तबाधःतद्विषयत्वेनवातेनैवनैराकांक्ष्यात् तौदुंबर
त्वेप्रकरणंविनियोजकंस्यादितिवाच्यं नहिप्राप्तबाधस्थलेचोदकेनपदार्थाःप्राप्यंते तथासतिशास्त्रप्राप्तत्वेनबाधोनस्यात् किंतर्हितानेव
पदार्थान्वस्तुतःप्रापयतियेविकृतौनबाध्यंतेतेचपदार्थाःप्रकृतिवच्छब्देनप्राप्यंते इतिभवतिपुरुषस्यभ्रांतिःयथाप्रकृतौकृतंतथाविकृ
तौकर्तव्यमितिसर्वेपदार्थाःप्राकृताःकर्तव्याइति अतश्चभ्रांतिप्राप्ताःस्वादिरत्वादयःशास्त्रप्रतिपन्नैरौदुंबरत्वादिभिर्बाध्यंते इतिभवति
तद्बाधःप्राप्तबाधः नचभ्रांतिप्रतिपन्नेनवैधीआकांक्षानिवर्तयितुंशक्यते तस्माद्युक्तं उभयाकांक्षारूपप्रकरणासंभवात् विकृतौप्राकृतागान्
वादेनविधीयमानानामौदुंबरत्वादीनांप्रकरणंविनियोजकमिति पृषदाज्येनानुयाजान्यजतीतिप्रकृतानुवादेनविधीयमानंपृषदाज्यमपि
प्रकरणाद्विकृत्यंगमितिकेचिदार्याः अस्मात्तातचरणास्तुएवमाहुः पृषदाज्यंहिअनुयाजानुवादेनविधीयते तत्स्वरूपेचानर्थक्यप्राप्तौतेनै
विकृत्यपूर्वंलक्षयितुंयुक्तंविप्रकर्षात् किंतुदीक्षणीयावाङ्गियमन्यायेनस्वापूर्वमेवलक्षयितुंयुक्तंसन्निकर्षात् अतएवोत्पवनादीनांप्रोक्ष
णाद्यपूर्वप्रयुक्तत्वमुक्तं नवमे अतश्चविधीयमानस्यपृषदाज्यस्यवाक्यप्रतिपन्नेनानुयाजापूर्वेणैवनैराकांक्ष्यात् नप्रकरणाद्विकृत्यपूर्वार्थ
त्वमिति वयंतु अंगीकृत्यापिविकृत्यर्थंब्रूमः भवतुवाविकृत्यर्थत्वंपृषदाज्यस्य तथापिनप्रकरणंविनियोजकंभवतीति यूपपृष्ठभावेनहियावत्
स्वादिरत्वमायाति तावदेवौदुंबरत्वविधानादुभयाकांक्षायुक्तत्वाद्युक्तःप्रकरणविनियोगः एवं यावदनुयाजपृष्ठभावेनाज्यमायाति
तावदेवयदिपृषदाज्यंविधीयतेतदोभयाकांक्षासंभवात्प्रकरणविनियोगोभवेत् नत्वेतदस्ति नहिपृषदाज्यंनामद्रव्यांतरंकिंचिदस्ति यदा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्यस्थानापन्नं विधीयते औदुंबरत्वमिव खादिरत्वस्थानापन्नं पृषच्छब्दस्य पृषन्मणिरित्यादौ चित्रतावाचित्वेन दृष्टत्वात् पृषदाज्यशब्दस्य
चित्राज्यवाचित्वात् अत एव निगमेषु आज्यपानित्येवं वक्तव्ये न तु पृषदाज्यपानित्येवमुक्तं न च यावत्प्राकृतमाज्यमायाति तावदेव चित्रा
ज्यविधानात्प्रकरणाद्विनियोगः संभवतीति वाच्यं· न हि पृषदाज्यशब्देन चित्रतागुणविशिष्टमाज्यं विधीयते विशिष्टविधाने गौरवापत्तेः किंतु
प्राकृताज्यानुवादेन चित्रतागुणमात्रं विधीयते लोहितोष्णीषा ऋत्विजः प्रचरंतीतिवत् तदुक्तं दशमे चतुर्थे चरणांत्ये नवागुणशास्त्रत्वादिति
प्राकृतस्यैवाज्यस्य चित्रतागुणमात्रविधानमिति च शास्त्रदीपिका एवं च विकृतेः प्राकृतेनाज्येन कृप्तोपकारैः स्वानुयाजैः नैराकांक्ष्ये पश्चाद्विधी
यमानस्य चित्रतागुणस्योपहोमाद्यपूर्वांगवत्प्रकरणाद्विनियोजकं संभवति यदि हि प्राकृतस्य कस्यचिद्गुणस्य स्थाने चित्रतागुणो विधीयेत
तदा स गुणो यावदायाति तावद्विकृतेर्नैराकांक्ष्याभावाच्चित्रतागुणस्य तावदेव विधानादुभयाकांक्षासंभवात्प्रकरणाद्विनियोगो भवेत्· न च ताद
शः प्रकृतौ गुणोस्ति आज्यस्यानुयाजानां च चित्रतागुणस्याग्रेव विधानात् तस्य तत्स्थानापन्नत्वाभावाच्च· न चाज्यपृष्टभावेन यावत्प्रकृत
निर्गुणत्वमायाति तावदेवास्य विधानात्प्रकरणसंभव इति वाच्यं निर्गुणत्वस्याविहितत्वेन पाणिकंडूयनवदनंगत्वाद्विकृतेस्तदाकांक्षाभाव
त् तथा हि ज्योतिष्टोमे दक्षिणादानसमये विहितकृष्णविषाणास्यागस्य द्विरात्रादिषु चोदकप्राप्तस्य प्रथमेह्न्यननुष्ठानं उत्तरे हि दक्षिणादान
पूर्वकालीनैः पदार्थैः कृष्णविषाणाकंडूयनस्य शास्त्रविहितत्वेनापेक्षितत्वात् ज्योतिष्टोमे च दक्षिणादानोत्तरकालं पाणिकंडूयनं दृष्टमपि
द्विरात्रादिषु प्रथमेह्न्यनुष्ठीयमानैर्दक्षिणादानकालीनैः पदार्थैर्नापेक्ष्यते तस्य प्रकृतावार्थसिद्धत्वेनाशास्त्रीयत्वादिति एवं निर्गुणत्वस्या
विहितत्वेन विकृतेस्तदपेक्षा नास्ति तस्मादुभयाकांक्षाया असंभवात्पृषदाज्यस्य न प्रकरणाद्विनियोगः संभवतीत्यलमतिविस्तरेण तत्सिद्ध

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाप्रकरणं प्रकृतावेव विनियोजकं विकृतौ तु यत्प्रकृतधर्मानुवादेन विधीयते तस्य विनियोजकं न तु केवलं विधीयमानस्यापूर्वांगस्येति यत्तु विकृतावपि प्राकृतधर्मानुवादेन विधीयमानयोर्धर्मयोरंतराले ऽपूर्वमप्यंगं केवलं पठ्यते तदपि प्रकरणेन विनियुज्यते यद्यपि विकृतेः कथंभावाकांक्षा प्राकृतैरेवांगैः शाम्यति तथापि यत्र प्राकृतांगानुवादेन धर्मविधानं तत्र तद्विधानं यावद्भवति तावत्कथंभावाकांक्षा निवर्त्तते ऽतो विकृतेराकांक्षावत्वादंतराले विहितस्याप्यपूर्वस्यांगस्य भाव्याकांक्षासत्वात् युक्तं तस्य प्रकरणात्प्रकृत्यर्थत्वं यथामनहोमेषु ते हि प्राकृतांगेन विधीयमानयोर्धर्मयोरंतराले विधीयंते इत्युक्तं तंत्ररत्नादावित्यास्तां तावत् फलभावनाया अंतराले यदंगभावनायाः प्रकरणं तदवांतरप्रकरणं तच्चाभिक्रमणादीनां प्रयाजादिषु विनियोजकं तच्च संदंशेन ज्ञायते तदभावे अविशेषात्सर्वेषां फलभावनाकथंभावेन ग्रहणात् संदंशो नामैकांगानुवादेन विधीयमानयोरंगयोरंतराले न विहितत्वं यथाभिक्रमणं तद्धि समानयते जुह्वमु उपभृत इत्यादिना प्रयाजानुवादेन किंचिदंगं विधाय विधीयते पश्चादपि प्रयाजानुवादेन यो वै प्रयाजानां मिथुनं वेदेत्यादिना किंचिदंगं विधीयते अतः प्रयाजांगमध्ये पठितमभिक्रमणं तदंगं भवति तत्कथंभावाकांक्षाया अशांतेः तदुक्तं परप्रकरणस्थानामंगे श्रुत्यादिभिः स्त्रिभिः ज्ञाते पुनश्च तैरेव संदंशेन तद्दिष्यत इति न चांगभावनायाः कथंभावाकांक्षाभावात्कथं प्रयाजभावनाकथंभावेनाभिक्रमणं गृह्यत इति वाच्यं भावनासाम्येन सर्वत्र कथंभावाकांक्षायाः सत्वात् प्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेदित्युक्ते यो नाम न जानाति प्रयाजैरपूर्वं कर्तुं तस्य भवत्येव कथंभावाकांक्षा कथमेभिरपूर्वं कर्त्तव्यमिति सा च संदंशपतितैर्वाचनिकैः स्मार्तैश्चाचमनादिभिः शाम्यति तदभावे च स्वरूपनिष्पादनेन दर्विहोमन्याये न निवर्त्तते दर्विहोमेषु हि स्वरूपनिष्पादनातिरिक्तस्तथाव्यापारो न श्रूयते नाप्यतिदेशेन तत्प्राप्तिः यागीयानां धर्माणां तावन्नातिदेशो यागत्वे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहोमत्वेन वैलक्षण्यात्· नापि होमीयानां कस्य धर्मः कस्मिन्होमे प्रवर्त्तते इति विशेषनिर्णायेमानाभावात्· अतो धर्मग्राहाभावात्· दर्वि
होमे रिष्टं भावयेत्कथमित्युत्पन्नाप्याकांक्षा स्वरूपनिष्पादनेनैव शाम्यति एवं येष्वंगेषु संदंशाद्यभावः तत्रोत्पन्नाप्याकांक्षा तेनैव निवर्त
ते न तु सर्वथा तदभावः तस्माद्युक्तमुक्तं अभिक्रमणं प्रयाजांगमिति तद्वेदमवांतरप्रकरणं महाप्रकरणाद्बलीयः संदंशपतितानां धर्मा
णां कैमर्थ्याकांक्षायां प्रधानापूर्वात् प्रयाजाद्यपूर्वस्य झटित्युपस्थितेरिति प्रकृतमनुसरामः तत्सिद्धमुभयविधस्य प्रकरणस्य विनियोज
कत्वं तदिदं स्थानादिप्रमाणात्प्रबलं यत्र हि स्थानादंगत्वं तत्रान्यतरस्य प्रकारांतरेण निराकांक्षत्वं न च साकांक्षं निराकांक्षेण संबंद्धुं योग्यं विना
कांक्षोत्थापनेन· अतश्चान्यतराकांक्षया यावदुभयाकांक्षारूपप्रकरणकल्पनद्वारा वाक्यादिकं कल्पयितुमारभ्यते तावत् झटिति प्रक
रणेन वाक्यादिकं कल्पयित्वा विनियोगः क्रियत इति स्थानात्प्रकरणस्य बलीयस्त्वं· अत एव वैदिदेवनादयो धर्माः अभिषेचनीयसंनिधौ पठि
ता अपि नाभिषेचनीयस्यांगं तेषां तदंगत्वं भवेत्स्थानान्न तु भवेत्प्रकरणात्· अभिषेचनीयस्याव्यक्तचोदनाचोदितत्वेन ज्योतिष्टोमविकार
त्वात्· प्राकृतैरेव धर्मैर्निराकांक्षत्वात्· किंतु प्रकरणाद्राजसूयांगं· ननु राजसूयेन स्वाराज्यकामो यजेतेत्यत्र राजसूयशब्दस्तावन्नामधेयत्वा
दाख्यातपरतंत्रः पश्चाख्यातं वर्त्तते तत्रैव वर्त्तते· न च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र यथा दर्शपूर्णमासपदं नामधेयमपि नाख्यात
परतंत्रं· तत्र हि यजेतेत्यत्राख्याते अविशेषात्सर्वानेव प्राकृतानाग्नेयादीनप्रयाजादींश्चाभिधातुं समर्थः दर्शपूर्णमासपदं त्वाग्नेयादीनेव व
दति न सर्वान् अतश्च न तदाख्यातपरतंत्रं तथा राजसूयपदमपि किं न स्यादिति वाच्यं· प्रसिद्धेन हि पदेनाप्रसिद्धं निर्णीयते यथाहुः पदमज्ञातसं
दिग्धं प्रसिद्धैरपृथक् श्रुति निर्णीयते निरूढं तु न स्वार्थादपनीयते इति दर्शपूर्णमासपदं तु कालनिमित्तं तद्योगश्चाग्नेयादिषूत्पत्तिवाक्यैरवग

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तः अतस्तद्वाचित्वेन दर्शपूर्णमासपदं प्रसिद्धं नचाग्नेयादीनां बहुत्वाद्द्विवचनांतत्वमस्यानुपपन्नमिति वाच्यं· विद्वाक्यद्वयसिद्धसमुदायद्व
याभिप्रायेणातदुपपत्तेः एवं च दर्शपूर्णमासपदस्याग्नेयादिवाचित्वनिर्णीते यजेतेत्याख्यातमपितानेव वदति नहि तदुक्तो स्वार्थत्यागो भव।
तिराजसूयपदं त्वनिर्णीतार्थं अतस्तदाख्यातपरतंत्रमेव· तच्चाविशेषात्सर्वेष्विष्टिपशुसोमेषु वर्त्तते तत्तत्वाद्राजसूयपदमपि तानेव वदति·
नच राजसूयशब्दस्य राजा सूयते यत्रेति व्युत्पत्त्या सोमाभिषवनिमित्तत्वात्तस्य सोममभिषुणोतीति वाक्येन सोमयागेष्ववगतत्वात्तद्वाचित्वमेव न
ष्टिपशुवाचित्वमिति वाच्यं नह्याभिषेचनीयादिसोमयागेषु अभिषवः प्रत्यक्षेणवाक्येन चोदितोस्ति तद्वाक्यस्य ज्योतिष्टोमे सत्वात् अतिदेशात्त
त्संबंधोवगत इति चेत् नातिदेशस्य फलसंबंधोत्तरकालीनत्वेन राजसूयेन स्वाराज्यकामो यजेतेत्येतद्वाक्यार्थावगत्युत्तरकालीनत्वात् अनेन
हि वाक्येन फलसंबंधे बोधिते पश्चात्कथंभावाकांक्षायामतिदेशकल्पनासंभवात् अतस्ततः प्रागेवैतद्वाक्यार्थो वर्णनीयः तदा चाभिषवस्यानव
गतत्वाद्राजसूयपदमप्रसिद्धार्थमेव अत एव राजसूयपदमव्युत्पन्नमश्वकर्णशब्दवदित्युक्तं सांप्रदायिकैः एवं चासिद्धार्थत्वेनाख्यातपरतंत्र
त्वाद्राजसूयपदेनेष्टिपशुसोमयागा उच्यंते ते चैतस्तैः प्राकृतैर्धर्मैर्निराकांक्षा इति न प्रकरणं विदेवनादीनां राजसूये विनियोजकं उभयाकांक्षाया
अभावात् नच प्रातस्विकरूपैर्निराकांक्षेपि न राजसूयत्वेन रूपेणानैराकांक्ष्यमिति वाच्यं आकांक्षाद्वये प्रमाणाभावात् किंच प्रातस्विकरूपैर्याकथं
भावाकांक्षा सापि फलसंबंधोत्तरकालं स च राजसूयत्वेन न तु प्रातस्विकरूपैः राजसूयत्वेन च फलसंबंधे उत्पन्नायाः कथंभावाकांक्षायाः विदेव
नादिभिः शांतेरतिदेशकल्पनमेव न स्यात् यदि हि सामान्यरूपेण प्रातस्विकरूपेण च फलसंबंधविधायकवाक्यद्वयं भवति तदा युज्येताकांक्षा
द्वयानुसारेण विदेवनादीनामतिदेशिकादीनां चांगानां संबंधो न तु तदस्ति तस्मात्प्राकृतधर्मैर्निराकांक्षान्न विदेवनादीनां प्रकरणं विनियोजकमि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

 तिचेत्सत्यं अतएवसांप्रदायिकैर्विदेवनादीनांसंदंशोदर्शितः राजसूयत्वपुरस्कारेणयेधर्माविधीयंते राजसूयाययज्ञेनाउत्सुनातिइत्येवमाद
 य· तन्मध्येविदेवनादयःपठ्यंते अतस्तेसर्वेराजसूयांगंप्रयाजानुवादेनविधीयमानधर्ममध्येपठितं प्रयाजाभिक्रमणवत् तस्माद्युक्तमु
क्तंविदेवनादीनांप्रकरणाद्राजसूयांगत्वमिति तत्सिद्धंप्रकरणस्यस्थानाद्बलीयस्त्वमिति देशसामान्यंस्थानंतच्चद्विविधंपाठसादेश्यमनु
ष्ठानसादेश्यंचेति यथाहुः तत्रक्रमोद्विधैवेष्टोदेशसामान्यलक्षणः पाठानुष्ठानसादेश्याद्विनियोगस्यकारणमिति स्थानंक्रमइत्यनर्थांतरं पा
ठसादेशमपिद्विविधंयथासंख्यापाठःसंनिधिपाठश्चेति तत्रऐंद्राग्नमेकादशकपालंनिर्वपेद्वैश्वानरंद्वादशकपालंनिर्वपेदित्येवंक्रमविहि
तेष्टिषुइन्द्राग्नीरोचनादिवइत्यादीनांयाज्यानुवाक्यमंत्राणांयथासंख्यंप्रथमस्यप्रथमंद्वितीयस्यद्वितीयमित्येवंयोविनियोगःसयथासंख्य
पाठात् प्रथमपठितमंत्रस्यहिकेमर्थ्याकांक्षायांप्रथममतोविहितमेवकर्मप्रथममुपतिष्ठतेसामान्यदेशत्वात् यानितुवैकृतान्यंगानिप्रा
कृतांगानुवादेनविहितानिसंदंशपतितानितेषांविकृत्यर्थत्वंसंनिधिपाठात् तेषांहिकेमर्थ्याकांक्षायांफलवद्विकृत्यपूर्वमेवभाव्यत्वेनसंब
ध्यते उपस्थितत्वात् अतएवतेषुनविश्वजिन्न्यायावतारःस्वतंत्रफलार्थत्वविकृतिसंनिधिपाठानर्थक्यापत्तेः पशुधर्माणामाग्नीषोमीया
र्थत्वमनुष्ठानसादेश्यात् औपवसथ्येह्नि अग्निषोमीयःपशुरनुष्ठीयते तस्मिन्नेवदिनेतेधर्माःपठ्यंते अतस्तेषांकेमर्थ्याकांक्षायां अनुष्ठेयत्वेनो
पस्थितंपश्वपूर्वमेवभावनात्वेनसंबध्यते· अतोयुक्तमनुष्ठानसादेश्यात्तदर्थत्वंतेषां· नचपाठसादेश्यादेवतत्किंनस्यादितिवाच्यं· आग्नीषोमी
यस्यपशोःक्रयसन्निधौपाठात्· नचक्रयसन्निधौपाठेतदनुष्ठानमपितत्रस्यादितिवाच्यं· सएषद्विदेवत्यःपशुरौपवसथ्येह्नि आलब्धव्यमि
तिवचनात्तदनुपपत्तेः नचस्थानात्प्रकरणस्यबलीयस्त्वेनपशुप्रमापाठानांधर्माणांज्योतिष्टोमार्थत्वमेवकिंनस्यादितिवाच्यं· तस्यसोमयाग

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वेनपशुधर्मग्रहणेयोग्यत्वात्· अतआनर्थक्यप्रतिहितानांविपरीतंबलाबलमितिन्यायात्स्थानात्पशुयागत्वमेवधर्माणांयुक्तं: नचतेषांतदर्थत्वं
प्रकरणादेवकिंनस्यादितिवाच्यं· अग्निषोमीयकथंभावाकांक्षायाः क्लृप्तोपकारैः प्राकृतधर्मैरेवोपशांतत्वात्· सहिसान्नाय्ययागप्रकृतिकः उभयोः
पशुप्रभवत्वसामान्यात्· तदुक्तं सान्नाय्यंवातत्प्रभवत्वादिति सान्नाय्यंदधि पयसीतत्रापिपशुयागः पयोयागप्रकृतिकः साक्षात्पशुप्रभवत्वात् अ
तस्मादकप्राप्तेस्तद्धर्मैर्निराकांक्षत्वान्नपशुयागेधर्माणांप्रकरणंविनियोजकं किंतुस्थानमेवतदेवंनिरूपितः संक्षेपतः स्थानविनियोगः तच्च
समाख्यातःअबलंस्थानविनियोगेहिपदार्थयोर्देशसामान्यलक्षणः संबंधः प्रत्यक्षः समाख्याविनियोगेतुसंबंधोनप्रत्यक्षः पदार्थयोर्भिन्नदेश
त्वात्· नचसासंबंधवाचिकायौगिकानांशब्दानांद्रव्यवाचकत्वेनसंबंधावाचकत्वात्· तथाहि समाख्यासंबंधसामान्यवाचिकास्या द्विशेषवा
चिकावानाद्यः तदुक्तौप्रयोजनाभावात्· सर्वयौगिकशब्दानांपर्यायत्वापत्तेश्च द्वितीयेऽवश्यंसंबंधिनौवाच्यौ तदंतरेणसंबंधेविशेषाभावात्·
तत्प्रतिपत्तिमंतरेणातदप्रतिपत्तेश्च अतश्चावश्यंसंबंधिवाचकत्वे समाख्याया वक्तव्यं· तथाचनसंबंधवाचकत्वे संबंधिप्रतिपत्त्यैववाक्या
र्थप्रतिपत्तिन्यायेनतत्प्रतिपत्तिसंभवेतत्रशक्तिकल्पनेगौरवात् यथाहुः सर्वत्रयौगिकैःशब्दैर्द्रव्यमेवाभिधीयते नहिसंबंधवाच्यत्वंसंभवत्य
तिगौरवादिति· तथापाकंतुपचिरेवाहकर्त्तारंप्रत्ययस्तथा पाकयुक्तः पुनःकर्त्तावाच्योनैकस्यकस्यचित् इतितथाचनसमाख्यासंबंधवाचि
का· होतृचमसइत्यादिकातुवैदिकीसमाख्या निषादस्थपतिशब्दवन्नषष्ठ्यर्थसंबंधवाचिकानापिवाक्यैकत्तद्वाचिका तस्याःपदत्वेनाप्रमाण
त्वात्पौरोडाशिकमित्यादिसमाख्यास्तु अतिदुर्बलाः लौकिकत्वेनपुरुषप्रत्ययसापेक्षत्वात् काण्डगोचरत्वेनतत्तत्पदार्थगोचरत्वाच्च काण्डवा
चकत्वमपिनकांडत्वेनकिंतुपौरोडाशिकत्वादिनैव· नह्येकहायनीशब्दोद्रव्यवाचकोपिगोत्वेनतद्वदितिकिंतर्हिएकहायनीत्वेनैवस्थानवि

CC-0. Gurukul Kangri Collection, Haridwar

न्या·मी· नियोगे तु यदार्थयोर्विशेषपुरस्कारेणैव संबंधः प्रत्यक्षप्रमाणप्रतिपन्नः अतश्च समाख्यामुपलभ्य नूनमनयोः पदार्थयोः संबंधोस्तीति यावत्क
१६ ल्प्यते तावत्प्रत्यक्षप्रतिपन्नेन संबंधेन परस्परमाकांक्षा कल्प्यते तदभावे संबंधानुपपत्तेः कल्पितसंबंधेन च यावदितरत्राकांक्षादि कल्प्यते ता
वदन्यत्राकांक्षया वाक्यादिकल्पनया विनियोगः क्रियत इति सिद्धं स्थानस्य समाख्यातः प्राबल्यं· अत एव शुंधनमंत्रः सान्नाय्यपात्रांगं पाठसा
देश्यात् न तु पौरोडाशिकसमाख्यया पुरोडाशपात्रांगमिति समाख्या यौगिकः शब्दः सा च द्विधा वैदिकी लौकिकी च तत्र होतुश्चमसभक्षणांगत्वं
होतृचमस इति वैदिक्या समाख्यया अध्वर्योस्तत्तत्पदार्थांगत्वं लौकिक्या आध्वर्यवमिति समाख्ययेति संक्षेपतः श्रुत्यादीनि षट् प्रमाणानि· एतत्सहकृ
तेन विनियोगविधिना समिधादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेतेत्येवरूपेण यानि विनियुज्यंते तान्यंगानि· द्विविधानि· सिद्धरूपाणि क्रियारू
पाणि चेति तत्र सिद्धानि जातिद्रव्यसंख्यादीनि तानि च दृष्टार्थान्येव क्रियारूपाणि च द्विविधानि गुणकर्माणि चेति एतान्येव सन्निपत्योपकारीणि आ
रादुपकारकाणीति चोच्यंते तत्र कर्मांगद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकं यथावघातप्रोक्षणादि तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं
च दृष्टार्थमवघातादि अदृष्टार्थं प्रोक्षणादि दृष्टादृष्टार्थं पशुपुरोडाशयागादि तच्च द्रव्यत्यागांशेनादृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति इ
दमेव सामवायिकं कर्मेत्युच्यते तच्च सन्निपत्योपकारकं द्विविधं उपयोक्ष्यमाणार्थमुपयुक्तार्थं चेति· तत्रावघातप्रोक्षणाद्युपयोक्ष्यमाणार्थं व्री
हीणां यागे उपयोक्ष्यमाणत्वात् प्रतिपत्तिकर्मेडाभक्षणादि उपयुक्तपुरोडाशसंस्कारकं उपयुक्तस्याकीर्णकरणानिवर्तकं कर्म प्रतिपत्तिकर्म उ
पयुक्तसंस्कारार्थं च कर्म उपयोक्ष्यमाणसंस्कारार्थाद्दुर्बलं उपयुक्तापेक्षया उपयोक्ष्यमाणोत्पादकत्वात्· अत एव प्रापणीयनिष्कासे उदयनीयमनु रामः
निर्वपतीत्यत्र निष्कासस्य निर्वापार्थत्वं न तु तस्य तदर्थत्वं निष्कासस्योपयुक्तत्वादित्युक्तमेकादशे तच्च सन्निपत्योपकारकं आरादुपकारकाद्बली १६
प्रधानकर्मणि॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः नन्ववघातादिनामभवतु बलीयः तस्य दृष्टार्थत्वात् आरादुपकारकस्य चादृष्टार्थत्वात् दृष्टे च संभवति अदृष्टार्थस्यान्याय्यत्वात् प्रोक्षणादिस
न्निपत्योपकारकं तु कथं बलीयः उभयोरदृष्टार्थत्वाविशेषात् किं चारादुपकारकं साक्षात्प्रधानांगं तस्यान्योद्देशेनाविधानात् सन्निपत्योपकारकं तु
अंगांगं कामं गव्रीह्याद्युद्देशेन विधानात् अंगांगापेक्षया च साक्षादंगं बलीयः अंगगुणविरोधे तादर्थ्यादिति न्यायात् अत एवेष्ट्या पशुना सोमेन
यजेत सोमावास्यायां पौर्णमास्यां वा यजेतेत्यविशेषविधाने पर्वानुग्रहः सोमयागस्यैव क्रियते न तद्दीक्षणीयादेः अतः कथं सन्निपत्योपकारकस्य
बलीयस्त्वं उच्यते सत्यप्यदृष्टार्थत्वाविशेषे सन्निपत्योपकारकमारादुपकारकाद्बलीयः सन्निपत्योपकारके हि कर्मणि उपकार्योपकारकयोर्व्री
हिप्रोक्षणयोः संबंधो वाक्यलभ्यः उपकारमात्रं तु कल्प्यम् आरादुपकारकस्य त्वेतु दर्शपूर्णमासप्रयाजयोः संबंधः कल्प्यः उपकारोपि किंच आराद
पकारकस्य त्वेहि प्रकरणं विनियोजकं इतरत्र व्रीहीन्प्रोक्षतीति वाक्यमेव व्रीहिपदेनापूर्वसाधनलक्षणां कृत्वा कृत्तो विनियोजकमिति बलीयस्त्वं ।
यच्चोक्तं अंगगुणविरोधे तादर्थ्यादिति न्यायेन दुर्बलत्वमिति तदसत् नहि व्रीह्याद्युद्देशेन विधीयमानं प्रोक्षणादि तदर्थं भवति तत्स्वरूपे आन
र्थक्यात् किंतु तत्संस्कारद्वारा क्रत्वर्थमेव सन्निपत्योपकारकाणामुत्पत्त्यपूर्वप्रयुक्तत्वस्य वक्ष्यमाणत्वात् अत उभयविधमप्यंगजातं क्रत्व
र्थमेवेति नांगगुणविरोधन्यायावतारः दीक्षणीयादेः पूर्वानुग्रहस्तु दीक्षणीयाद्यर्थ एव तस्य तदपूर्वप्रयुक्तत्वात् अतो युक्तं साक्षात्प्रधानांगेन प
र्वानुग्रहेण सबाध्यत इति तत्सिद्धं सन्निपत्योपकारकाद्बलीयस्त्वं अत एव स्थाणौस्या एवाहुतिं जुहोति इति विहितास्या एवाहुतिर्यूपव्रश्चनेति
स्थाणुद्वारा यूपसंस्कारार्था देवदत्तधारितायाः स्रजः शुचिदेशविधानमिव देवदत्तसंस्कारार्थं न तु स्या एवाहुतिरारादुपकारके त्वुक्तं दशमे इति दि
क् द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकं यथा प्रयाजादि तदेवं निरूपितं द्विविधमप्यंगजातं तच्च न यागस्वरूपप्रयुक्तं स्वरूपे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनर्थक्यात् तदंतरेणापि तत्सिद्धेः किंत्वपूर्वप्रयुक्तमेव नहि तदंतरेणापूर्वं भवतीत्यत्र किंचित्प्रमाणमस्ति नस्यादृष्टत्वात्॰ न चैवं प्राधान्याददृष्टत्वाच्च फलप्रयुक्तत्वमेव किं न स्यादिति वाच्यं॰ फलभावनायां यागस्य करणत्वात्॰ अंगानां च करणानुग्राहकत्वात् तदर्थत्वे तु द्वेतत्र चानर्थक्यप्रसक्तौ तेन यागेन स्वापूर्वमेवोपस्थाप्यते सन्निकर्षात् दीक्षणीयादिशब्देनैव तदपूर्वं न तु फलमुपस्थाप्यते विप्रकर्षात् अतो न तत्प्रयुक्तत्वमंगानां अत एव अगन्म सुवः सुवरगन्मेति मंत्रो विकृतावूहितव्य इत्युक्तं नवमे फलदेवतयोश्चेत्यत्र फलप्रयुक्तत्वे तु सौर्यादिविकृतिषु स्वर्गरूपफलाभावान्मंत्रो न प्रवर्त्तेत नतरां चोहितव्यः स्यादिति तत्सिद्धमंगानामन्यप्रयुक्तत्वानुपपत्तेरपूर्वप्रयुक्तत्वं तत्रापि सन्निपत्योपकारकाणां द्रव्यदेवतादिसंस्कारद्वारा यागस्वरूपे उपयोगादुत्पत्त्यपूर्वार्थत्वं॰ अत एव औषधधर्मविघातादीनामाज्ये प्रवृत्तिः तेषामाग्नेयापूर्वप्रयुक्तत्वात्॰ आज्यस्य च तदर्थत्वाभावादित्युक्तं द्वितीये आरादुपकारकाणां तु स्वरूपेनुपयोगात्॰ परमापूर्वार्थत्वं तत्रोत्पत्त्यपूर्वस्य यागस्वरूपानुष्ठानानंतरमेवोत्पद्यमानत्वात्सन्निपत्योपकारकाणां पूर्वांगानां तदुत्पत्तावुपयोगः उत्तरांगानां तु तेषां तत्स्थितावुपयोगः परमापूर्वस्य तु सांगप्रयोगानुष्ठानानन्तरमेव उत्पद्यमानत्वात् सर्वेषामारादुपकारकाणां तदुत्पत्तौ प्रयोगबहिर्भूतस्य तु तत्स्थितावुपयोगः यथा बृहस्पतिसवस्य वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयोत्तरकालमंगत्वेन विहितस्य वाजपेयापूर्वस्थितावुपयोगः तस्य प्रागेवोत्पन्नत्वादित्युक्तं चतुर्थे तत्सिद्धं सर्वेषामंगानामपूर्वार्थत्वं प्रकृतमनुसरामः तदेवं निरूपितः संक्षेपतो विनियोगविधिः प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः स चांगवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव स हि सांगं प्रधानमनुष्ठापयन् विलंबे प्रमाणाभावात् अविलंबापरपर्यायं प्रयोगप्राशुभावं विधत्ते न च विलंबवदविलंबेपि प्रमाणाभाव इति वाच्यं विलंबे हि अंगप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः प्रसज्यते नहि विलंबेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियमाणयोः पदार्थयोः सहकृतत्वमिति साहित्यं व्यवहरंति नचैवं साहित्यानुपपत्त्या समकालमेवस्यान्नत्वविलंवः अव्यवधानेन पूर्वो
त्तरकालक्रियमाणयोः पदार्थयोरविलंवेन कृतमिति व्यवहारादिति वाच्यं अनेकपदार्थानामेकस्मिन्कालेनुष्ठानानुपपत्तेः नचैतावत्कर्त्तृ
संप्रतिपादने नानुष्ठानं किन्तस्यादिति वाच्यं तस्यैतस्य यज्ञस्य तु चत्वार ऋत्विज इत्यादिना कर्त्तॄणां नियतत्वात् तस्मादंगवाक्यैकवाक्यतामाप
न्नः प्रधानविधिरेकवाक्यावगततत्साहित्यं विदधदुक्तविधया एककालानुष्ठानानुपपत्तेरविलंवं विधत्त इति सिद्धं प्रयोगप्राशुभाववोध
को विधिः प्रयोगविधिरिति सचाविलंवो नियतेन क्रमेणाश्रियमाणो भवति अन्यथा किमेतदनंतरमेतत्कर्त्तव्यमेतदनंतरमेवेति प्रयोगविले
पापत्तेः अतः प्रयोगविधिरेवस्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतक्रममपि पदार्थविशेषणतया विधत्ते तत्र क्रमो नाम विततिविशेषः
पौर्वापर्यरूपो वा तत्र च षट् प्रमाणानि श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि तत्र क्रमपरं वचनं श्रुतिः तद्द्विविधं केवलक्रमपरं तद्विशिष्टपदा
र्थपरं चेति तत्र वेदं कृत्वा वेदीं करोतीति केवलक्रमपरं वेदिकरणादेर्वचनांतरेण विहितत्वात् वषट्कर्त्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थ
परं एकप्रसरताभंगभयेन भक्ष्यानुवादेन क्रममात्रस्य विधातुमशक्यत्वात् सेयं श्रुतिरितरप्रमाणापेक्षया वलवती तेषां वचनकल्पनद्वारा क्र
मप्रमाणत्वात् अत एवाश्विनस्य पाठक्रमात् तृतीयस्थाने ग्रहणप्रसक्तौ आश्विनो दशमो गृह्यत इति वचनाद्दशमस्थाने ग्रहणमित्युक्तं यत्र प्र
योजनवशेन निर्णयः स आर्थक्रमः यथाग्निहोत्रहोमयवागूपाकयोः अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते सचायं
पाठक्रमाद्वलवान् यथापाठं ह्यनुष्ठाने कॢप्तप्रयोजनवाधः अदृष्टार्थत्वं च स्यात् नहि होमानंतरं। क्रियमाणानंतरं क्रियमाणस्य किंचिद्दृष्टं प्रयोजन
म् पदार्थवोधकवाक्यानां यः क्रमः स पाठक्रमः॥ तस्माच्च पदार्थानां क्रम आश्रीयते येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतानि ॥

CC-0. Gurukul Kangri Collection, Haridwar

वायंमंत्रपाठो २

न्या॰मी॰ अर्थप्रत्ययंजनयंति यथार्थप्रत्ययंच पदार्थानामनुष्ठानात् स च पाठो द्विविधो मंत्रपाठो ब्राह्मणपाठश्चेति तत्राग्नेयाग्नीषोमीययोस्तत
१८ याजानुवाक्यानांक्रमाद्यःक्रम आश्रीयते स मंत्रपाठ क्रमात् स च ब्राह्मपाठ क्रमाद्बलवान् अनुष्ठाने ब्राह्मणवाक्यापेक्षया मंत्रवाक्यस्यांत
रंगत्वात् ब्राह्मणवाक्यंहि प्रयोगाद्बहिरेवेदमेवं कर्त्तव्यमित्येवमवबोध्यकृतार्थमितिन पुनः प्रयोगकाले व्याप्रियते मंत्राः पुनरनन्यप्रयो
जनाः प्रयोगसमवेतार्थस्मारका इति वक्ष्यामः तेनानुष्ठानक्रमस्यस्मरणाक्रमाधीनत्वात्तत्क्रमस्यच मंत्र क्रमाधीनत्वादंतरंगो मंत्रपाठ इत
रस्मादिति बलवान् अत एवाग्नेयाग्नीषोमीययो ब्राह्मणपाठादादावग्नीषोमीयानुष्ठानं पश्चादाग्नेयानुष्ठानमित्येवक्रमं बाधित्वा मंत्रपाठादा
दावाग्नेयानुष्ठानं पश्चादग्नीषोमीयस्येत्युक्तं प्रयाजानां समिधो यजति तनूनपातं यजतीत्येवं विधायकृतार्थानि तथापि प्रयाजानां स्मारकान्त
रस्याभावात्तान्येव स्मारकत्वेन स्वीक्रियंते तथा च येन क्रमेण तान्यधीतानि तेनैव क्रमेणार्थस्मरणं जनयंतीति युक्तं तेनैव क्रमेण तेषामनुष्ठा
नमिति तस्मिद्धं प्रयाजानां ब्राह्मणपाठक्रमात्क्रम इति ननु प्रयाजेषु प्रयोगसमवेतार्थस्मारकत्वं विधायकत्वेन कृतार्थानां ब्राह्मणवाक्यानां कि
मिति स्वीक्रियते प्रयोगसमवेतार्थस्मारकाणां याज्यामंत्राणामाग्नेयादिष्विवात्रापि सत्वात् न च तेषां देवतास्मारकत्वात्कर्मस्मारकत्वेन ब्राह्म
णवाक्यं स्वीक्रियत इति वाच्यम् आग्नेयादिष्वपि कर्मस्मारकत्वेन तत्स्वीकारापत्तेः न चेष्टापत्तिः तथा सति ब्राह्मणपाठान्मंत्रपाठस्य बलीय
स्त्वं न स्यात् तद्बलीयस्त्वे हि मंत्राणां प्रयोगसमवेतार्थस्मारकत्वमितरस्य तदस्मारकत्वमेवास्तु यदि च कर्मस्मारकत्वं ब्राह्मणवाक्यस्य तर्हि तं
त् स्मारकत्वेन ब्राह्मणवाक्यस्यांतरंगत्वादन्तरंगभूतदेवतास्मारकत्वेन च वमंत्राणां बहिरंगत्वान्मंत्रपाठाद्ब्राह्मणपाठस्यैव बलीयस्त्वं स्या रामः
त् तथा च मंत्रतस्तु विरोधे स्यादिति पांचमिकाधिकरणविरोधः तत्र हि ब्राह्मणपाठान्मंत्रपाठस्य बलीयस्त्वादादौ आग्नेयानुष्ठानं पश्चादग्नी १८

कवाक्यक्रमाद्यः क्रमः स ब्राह्मणपाठक्रमः अत्र च यद्यपि ब्राह्मणवाक्यान्यि यं विधाय ८

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षोमीयस्येत्युक्तम् अथाग्नेयादिषु याज्यामंत्रा एव देवताप्रकाशनद्वारा कर्मप्रकाशका इज्यमानद्रव्योद्देश्यत्वरूपत्वाद्देवतस्येति चेत्तु त्वं प्र
याजेषु तत्रापि हि याज्यामंत्रं देवताप्रकाशकाः प्रयाजेषु देवतायामंत्रवर्णिकत्वात् तथा च प्रयाजेषु याज्यामन्त्राणां देवताप्रकाशनद्वारा
कर्मप्रकाशकत्वात्तत्क्रमो मंत्र— पाठादेव स्यात् न तु ब्राह्मणपाठक्रमात् न च मंत्रपाठस्यान्यादृशत्वात्प्रयाजक्रमो ब्राह्मणपाठक्रमादे
वेति वाच्यं अन्यादृशत्वे तस्यैव क्रमस्यानुष्ठाने स्यात् मंत्रक्रमस्य बलीयस्त्वात् अभ्यासाधिकरणे च वार्त्तिककृता क्रम विनियुक्तैर्वलिंगकर्म
त्रवर्णीत्यादिना प्रयाजेषु याज्यामंत्राणां क्रमविनियोग उक्तः नवमे तंत्ररत्ने समिधोऽग्न आज्यस्य व्यंतु इत्यादिभिः क्रमप्रकरणप्राप्तैर्मंत्रैर्देव
तागुणत्वेन समर्प्यते इत्युक्तं मंत्राणामन्यादृशक्रमत्वे तदनुपपत्तिः स्यात् तत्कथं प्रयाजेषु ब्राह्मणपाठक्रमात्क्रम इत्युच्यते सत्यमेतत् त
थापि यत्रार्थस्मारका मंत्रा न संत्येव यथा तूष्णीं विहितेषु कर्मसु तेषां क्रमो ब्राह्मणपाठक्रमात् तत्र तेषामेव प्रयोगसमवेतार्थस्मारकत्वात् प्रया
जोदाहरणं तु कृत्वा चिंत्यात त्र ब्राह्मणवाक्यानां प्रयोगसमवेतार्थस्मारकत्वाभावात् यथाहुरर्थवादचरणे वार्त्तिककाराः प्रयाज्यादिवाक्या
न्यर्थं समर्प्य चरितार्थानि स्वरूपसंस्पर्शे सत्यपि प्रयोज्यतां न प्रतिपद्यंते इति तस्मात्समंत्रककर्मणां पाठक्रमो मंत्रपाठात् अमंत्रककर्मणां क्रमस्तु
ब्राह्मणपाठक्रमादेवेति दिक् प्रकृतौ नानादेशानां पदार्थानां विकृतौ वचनादेकस्मिन्दे——— शेनुष्ठाने कर्त्तव्ये यस्य देशेनुष्ठीयंते तस्य प्रथ
ममनुष्ठानमितरयोस्तु पश्चादयं यः क्रमः स स्थानक्रमः स्थानं नाम उपस्थितिः यस्य हि देशेनुष्ठीयंते तत्पूर्वतनपदार्थे कृते स एव प्रथमसुपस्थि
तो भवतीति युक्तं तस्य प्रथममनुष्ठानं अत एव साद्यस्के अग्नीषोमीयसवनीयानुबंध्यानां सवनीयदेशे सहानुष्ठाने कर्त्तव्ये आदौ सवनीयपशोर
नुष्ठानं तस्मिन्देशे आश्विनग्रहणानंतरं सवनीयस्यैव प्रथममुपस्थितेः इतरयोस्तु पश्चात् तथा हि ज्योतिष्टोमे त्रयः पशुयागा अग्नीषोमीयः स

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनीय आनुबंध्यश्चेति ते च भिन्नदेशाः अग्नीषोमीय औपवसथ्येऽह्नि सवनीयः सुत्याकाले आनुबंध्यस्त्वंते साद्यस्को नाम सोमयागविशेषः स चा
व्यक्तत्वात् ज्योतिष्टोमविकारः अतस्तेत्रयोपि पशुयागाः साद्यस्के चोदकप्राप्ताः तेषां च तत्र साहित्यं श्रुतं सह पशूनालभेत इति· तच्च साहि
त्यं सवनीयदेशे तस्य प्रधानप्रत्यासत्तेः स्थानातिक्रमसाम्याच्च सवनीयदेशे ह्यनुष्ठाने क्रियमाणेग्नीषोमीयानुबंध्ययोः स्वस्वस्थानातिक्रम
मात्रं भवति अग्नीषोमीयदेशेत्वनुष्ठाने सवनीयस्य स्वस्थानातिक्रममात्रं आनुबंध्यस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्रमश्च स्या
त्· एवमानुबंध्यदेशेग्नीषोमीयस्य द्रष्टव्यः तथा च सवनीयदेशे सर्वेषामनुष्ठाने कर्त्तव्ये सवनीयस्य प्रथममनुष्ठानं आश्विनग्रहहणानंत
रं हि सवनीयदेशः प्रकृतौ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति इत्याश्विनग्रहणानंतरं तस्य विहित
त्वात् याच साद्यस्केप्याश्विनग्रहणे कृते सवनीय एवोपस्थितो भवति इति युक्तं तस्य स्थानात्प्रथममनुष्ठानं इतरयोस्तु पश्चादित्युक्तं प्रधा
नक्रमेण योंगानां क्रम आश्रीयते स मुख्यक्रमः येन क्रमेण प्रधानानि क्रियंते तेनैव चेत्क्रमेण तेषामंगान्यनुष्ठीयंते तदा सर्वेषामंगानां स्वैः प्रधा
नैस्तुल्यं व्यवधानं भवति व्युत्क्रमेण त्वनुष्ठाने केषांचिदंगानां स्वैः प्रधानैरत्यंतमव्यवधानमन्येषामत्यंतव्यवधानं स्यात्· तच्चायुक्तं प्रयोगविध्यव
गतसाहित्यबाधापत्तेः अतः प्रधानक्रमोप्यंगक्रमे हेतुः अत एव प्रयाजशेषेण आदौ आग्नेयहविषोभिधारणं पश्चादैंद्रस्य दध्नः आग्नेयया
गैन्द्रयागयोः पौर्वापर्यात् अत्र हि द्वयोरभिधारणयोस्स्वेन स्वेन प्रधानेन तुल्यमेकांतरितव्यवधानं भवति आग्नेयहविरभिधारणाग्नेययागयो
रैन्द्रयागहविरभिधारणेन व्यवधानात् ऐन्द्रयागहविरभिधारणेन्द्रयागयोश्चाग्नेययागेन व्यवधानात् अत श्चादावाग्नेयहविरभिधार रानः
णं तत ऐंद्रस्य हविषः तत आग्नेययागः तत ऐन्द्रो यागः इत्येवं क्रमो मुख्यक्रमात्सिद्धो भवति· यदि त्वादावैंद्रहविषोभिधारणं तत आग्नेय १९

CC-0. Gurukul Kangri Collection, Haridwar

हविषोःभिधारणं १

७ तत आग्नेयानुष्ठानं ततः सान्नाय्यानुष्ठानं

स्रं क्रियते तदा याज्यानुवाक्याक्रमवशादादावाग्नेयस्यानुष्ठानादाग्नेययागतदंगहविरभिधा—रणयोरत्यंतमव्यवधानमैन्द्रयागतदंगह
विरभिधारणयोस्त्वत्यंतव्यवधानं तच्चनयुक्तं अतोयुक्तः प्रयाजशेषाभिधारणस्यमुख्यक्रमात्क्रम इति सचायंमुख्यक्रमः पाठक्रमाद्दुर्ब
लः मुख्यक्रमोहि प्रमाणांतरस्यापेक्ष्यप्रधानक्रमप्रतिपत्तिसापेक्षतयाविलंबितप्रतिपत्तिकः पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रा
पेक्षतयानतथेति बलवान्· अतएवाग्नेयोपांशुयाजाग्नीषोमीयानांक्रमेणानुष्ठीयमानानामप्युपांशुयाजाज्यनिर्वापयोर्मुख्यक्रमान्नपूर्वमनु
ष्ठीयते तस्य दुर्बलत्वात्· पाठक्रमात्तुपश्चादनुष्ठीयते तस्य प्रबलत्वात् इति· सचायंमुख्यक्रमः ——— प्रवृत्तिक्रमाद्बलवान् प्रवृत्तिक्र
मेत्वाश्रीयमाणे बहूनामंगानां प्रधानविप्रकर्षोभवति अस्मिंस्त्वाश्रीयमाणेसन्निकर्षः तद्यथा दर्शपूर्णमासयोरादावाग्नेयानुष्ठानं ततः सा
न्नाय्यस्य तद्धर्माश्चकेचित्पूर्वमनुष्ठीयंते तत्र यदि प्रवृत्तिक्रममाश्रित्य तद्धर्माः सर्वेपूर्वमनुष्ठीयेरन् तत आग्नेयधर्माः तदा तद्धर्माणां स्वप्रधा
नेन सह द्वाभ्यामाग्नेयधर्मैस्तदनुष्ठानाभ्यां विप्रकर्षः स्यात् यदा तु सान्नाय्यधर्माणां केषांचित्पूर्वमनुष्ठानेपि अन्ये सर्वे मुख्यक्रममाश्रित्याग्ने
यधर्मानुष्ठानानंतरमनुष्ठीयंते तदा सर्वेषामाग्नेयधर्मसांनाय्यधर्माणामप्येकैकेन विजातीयेन व्यवधानं भवन्ति आग्नेयधर्माणां स्वप्रधानेन
सह सान्नाय्यधर्मैर्व्यवधानात् सांनाय्यधर्माणां स्वस्वप्रधानेन सहाग्नेयानुष्ठानेन व्यवधानादिति न विप्रकर्षः तस्मान्मुख्यक्रमः प्रवृत्तिक्रमाद्ब
लवान सह प्रयुज्यमानेषु प्रधानेषु सन्निपातितानामंगानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः सप्रवृ
त्तिक्रमः यथा प्राजापत्यांगेषु प्राजापत्या हि वैश्वदेवीं कृत्वा प्राजापत्यैश्चरंतीति वाक्येन तृतीयानिर्देशात् सेतिकर्तव्यताका एककालेन विहि
ताः अतस्तेषां तदंगानां चोपकरणनियोजनप्रभृतीनां साहित्यं संपाद्यं तत्र प्राजापत्यानां संप्रतिपन्नदेवताकत्वेनैकस्मिन्कालेनुष्ठानादुपप

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

द्यते साहित्यं तदङ्गानां चैकस्मिन्कालेनुष्ठानमशक्यं नह्यनेकेषां पशूनामुपाकरणमेकस्मिन्काले कर्तुं शक्यं अतस्तेषां साहित्यं अव्यवधाने नानुष्ठानात्संपाद्यं एकस्योपाकरणं कृत्वा परस्योपाकरणमिति अतः प्राजापत्येष्वेकं पदार्थं सर्वेष्वनुष्ठाय द्वितीयः पदार्थोनुष्ठेयः तत्र प्रथमपदार्थानुष्ठानं कस्मिंश्चित्पशोरारभ्य कर्तव्यं द्वितीयस्तु पदार्थो येन क्रमेण प्रथमोनुष्ठितस्तेनैव क्रमेणानुष्ठेयः प्रयोगविध्यवगतस्य मिथोङ्गसाहित्योपपत्तेः प्रयोगविधिना हि दैक्षतदङ्गानामुपाकरणनियोजनादीनां मिथः साहित्यमानन्तर्यापरपर्यायं विहितं तच्च साहित्यं सवनीयपशौ चोदकेन प्राप्तं तस्य प्राणिद्रव्यकत्वेन दैक्षविकृतित्वात् सवनीयाच्च एकादशिनीषु प्राप्तं सुत्याकालत्वसामान्यात् तेभ्यश्च प्राजापत्येषु प्राप्तं गुणत्वसामान्यात् प्राजापत्येषु च प्रतिपशु यागभेदाच्चोदका भिद्यन्ते अतश्चोदकान्तत्तत्पश्वङ्गभूतानां उपाकरणनियोजनादीनां साहित्यमानन्तर्यापरपर्यायं प्राप्तं अत एवैकस्य पशोरुपाकरणानन्तरमेव नियोजनं चोदकबलात् कर्त्तव्यत्वेन प्राप्तं तच्च न क्रियते प्रत्यक्षवचनावगतसर्वपश्वङ्गसाहित्यानुपपत्तेः अत एकस्मिन्पशौ उपाकरणे कृते तदनन्तरमेव कर्त्तव्यत्वेन प्राप्तमपि नियोजनं न क्रियते प्रत्यक्षवचनबलात्तु पश्वन्तरेषु षोडशसु उपाकरणमेव क्रियते कृते तु तेषु उपाकरणे प्रथमपशोर्नियोजनस्य तद्दीयोपाकरणेन व्यवधाने प्रमाणाभावात् प्रथमपशावेव नियोजनं कार्यं अतश्च येन क्रमेणोपाकरणं कृतं तेनैव क्रमेण नियोजनं कार्यं एवं च तत्तत्पशूपाकरणानां स्वस्वनियोजनैस्तुल्यं षोडशसंख्यैर्व्यवधानं भवति अन्यथा केषांचिदत्यन्तं व्यवधानं केषांचिदव्यवधानं स्यात् तच्च न युक्तं तस्माद्येन क्रमेण प्रथमः पदार्थोनुष्ठितस्तेनैव द्वितीयोनुष्ठेयः तत्सिद्धं प्रथमानुष्ठितपदार्थक्रमाद्यो द्वितीयपदार्थक्रमः स प्रवृत्तिक्रम इति तदेवं निरूपितः षड्विधक्रमनिरूपणेन प्रयोगविधिव्यापारः फलस्वाम्यबोधको विधिरधिकारविधिः फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वं स च यजेत स्व

संक्षेपतः १

Digitized by Arya Samaj Foundation Chennai and eGangotri

गेकामइत्येवंरूपः अनेनहिस्वर्गमुद्दिश्ययागंविदधता स्वर्गकामस्ययागजन्यफलभोक्तृत्वंप्रतिपाद्यते यस्याहिताग्नेरग्निर्गृहान्दहेत्सोग्नयेक्षा
मवते ष्टाकपालंनिर्वपेदित्यादिभिस्त्वग्निदाहादौनिमित्तेकर्मविदधद्भिर्निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यंप्रतिपाद्यते तच्चफल।
स्वाम्यं तस्यैवयोधिकारिविशेषणाविशिष्टः अधिकारिविशेषणंचतदेवयत्पुरुषविशेषणत्वेनश्रुतं अतएवराजाराजसूयेनस्वाराज्य
कामोयजेतेत्यनेनस्वाराज्यमुद्दिश्यराजसूयंविदधतापिनस्वाराज्यकाममात्रस्यतत्फलभोक्तृत्वंप्रतिपाद्यते किंतुराज्ञःसतस्तत्कामस्यकिं
न्तुपुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणंभवतियथाध्ययनविधिसिद्धाविद्याग्निसाध्येषुचकर्मसु आधानसिद्धाग्निमत्तासाम
र्थ्यंच एतेषांपुरुषविशेषणत्वेनाश्रवणेपि अधिकारिविशेषणत्वमस्त्येव उत्तरकर्मविधीनांज्ञानाक्षेपाशक्तेरभावेन अध्ययनविधि।
सिद्धज्ञानवंतंप्रत्येवप्रवृत्तेः अतएवशूद्रस्यनयागादावधिकारः तस्याध्ययनविधिसिद्धज्ञानाभावात् आधानविधिसिद्धाग्न्यभावाच्च
अध्ययनस्योपनीताधिकारत्वात् उपनयनस्यचाष्टवर्षंब्राह्मणमुपनयीतेत्यादिनात्रैवर्णिकाधिकारित्वात् तथाधानस्यापिवसंतेब्राह्मणो
ग्नीनादधीतेत्यादिनात्रैवर्णिकाधिकारित्वात् यद्यपिवर्षासुरथकारोग्नीनादधीतेत्यनेनरथकारस्यसौधन्वनअपरपर्यायस्याधानंविहितंयो
गाद्रूढेर्बलीयस्त्वात् तथापिनतस्योत्तरकर्मस्वधिकारः अध्ययनविधिसिद्धज्ञानाभावात् नचतदभावे आधानेपिकथमधिकारः तदनुष्ठानस्य
तत्साध्यत्वादितिवाच्यं तस्याध्ययनविधिसिद्धज्ञानाभावेपिवर्षासुरथकारोग्नीनादधीतेत्यनेनैवविधिनाधानमात्रोपयिकज्ञानापेक्षणात्।
अन्यथातस्यैवविधानानुपपत्तेः अतश्चरथकारस्याधानमात्रेधिकारेपिनोत्तरकर्मस्वधिकारोविद्याभावात् एवंचतदाधानंनाग्निसंस्कारार्थं।
संस्कृतानामग्नीनामुत्तरत्रोपयोगाभावात् किंतुतदाधानंलौकिकाग्निगुणकंविश्वजिन्न्यायेनस्वर्गफलंचस्वतंत्रमेवप्रधानकर्मविधीयते अं
अग्निसाध्यकर्मणांचानपेक्षत्वेनतद्विधीनामाधानसिद्धाग्निमंतंप्रत्येवप्रवृत्तेः ७॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्या·मी· ग्रीन्निति चद्वितीयासक्तून् जुहोतीतिवत्तृतीयार्था इतिप्रकृतमनुसरामः तस्मिद्धं शूद्रस्याध्ययनविधिसिद्धज्ञानाभावादाधानसिद्धाग्न्यभा
२१ वाच्चनोत्तरकर्मस्वधिकार इति नन्वेवं स्त्रिया अधिकारोनस्यात् तस्या अध्ययनप्रतिषेधेनतद्विधिसिद्धज्ञा नाभावात् नचवनास्त्येवेतिवा
च्यं यजेतस्वर्गकाम इत्यादौ स्वर्गकामपदस्योद्देश्यसमर्पकत्वेन पुंस्त्वस्योद्देश्यविशेषणत्वात् ग्रहैकत्ववदविवक्षितत्वेन स्त्रिया अधिकार
स्यासाध्यत्वादितिचेन्नैवं अधिकारः साधितोनतु स्वातंत्र्येण नस्त्रीस्वातंत्र्यमर्हतीत्यादिनातस्यानिषिद्धत्वात् स्वातंत्र्येणकर्तृत्वे प्रयोगद्व
युस्यापिवैगुण्यापत्तेश्च यजमानप्रयोगे पत्नीकर्तृकाज्यावेक्षणादिलोपात् पत्नीप्रयोगेच यजमानकर्तृकाज्यावेक्षणादिलोपात् अ
तोदंपत्योः सहाधिकारः ——— सहाधिकारत्वेच यजमानविद्ययैव पत्न्या अपिकार्यसिद्धेर्न ज्ञानंविनातस्या अधिकारानुपपत्तिः पा
णिग्रहणात्तु सहत्वं सर्वकर्मसु तथापुण्यफलेष्विति वचनेनस्त्रिया अधिकारनिर्णयाच्च निषादस्यपतेरिवाध्ययनविधिसिद्धज्ञानविर
हिणोपि एतयानिषादस्थपतिंयाजयेदिति वचनान्निषादेष्ट्यां निषादस्थपतिशब्दे हि निषादश्चासौस्थपतिश्चेति कर्मधारयो नतु निषादानां
स्थपतिरिति षष्ठीतत्पुरुषः षष्ठ्यर्थलक्षणापत्तेः एतावांस्तु विशेषः निषादस्याध्ययनविधिसिद्धज्ञानाभावेनतस्यैवविधेस्तत्कर्मोपयिक
ज्ञानाक्षेपकत्वं पत्न्यास्तु तादृशज्ञानाभावेपि यजमानेन सहाधिकारात्तस्य चतादृशज्ञानवत्त्वात्तेनैव च तस्याः कार्यसिद्धेर्नोत्तरक्रतुविधीनां
ज्ञानाक्षेपकत्वे येतु पत्नीमात्रकर्तृका पदार्थाः आज्यावेक्षणादयस्तेज्ञानंविनाशक्यानुष्ठाना इति तद्विधीनां तदाक्षेपकत्वं स्वीक्रियत इति त
त्सिद्धं अध्ययनविधिसिद्धज्ञानस्याधानविधिसिद्धाग्निमत्तायाश्चोत्तरकालकर्मस्वधिकारिविशेषणत्वमिति एवं सामर्थ्यस्याप्यधिकारिविशे रामः
षणत्वं असमर्थं प्रतिविध्यप्रवृत्तेः आख्यातानामर्थंब्रुवतां शक्तिः सहकारिणीतिन्यायात् तच्च सामर्थ्यं काम्यकर्मणि अंगप्रधानविषयंनत्वे २१

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गासमर्थः प्रधानमात्रसमर्थश्च काम्येधिकारी प्रधानविधेरंगविध्येकवाक्यतापन्नस्य सांगकर्मसमर्थं प्रत्येव प्रवृत्तेः यथाविनियोगमधिका
रात्· यदि हि समर्थं प्रति हि कयाचित् श्रुत्या विरोधः स्यात्· तदा असमर्थस्याप्यधिकारः स्यात्· न च विरोधोस्ति स्वर्गकामश्रुतेः समर्थं प्रति प्रवृ
त्तौ विरोधाभावात्· प्रत्युतासमर्थं प्रति प्रवृत्तौ प्रधानविधेरंगवाक्यैकवाक्य– तया प्रतिपन्नस्यांगसाहित्यस्य बाधापत्तेः नित्यवत् श्रुतानाम
गानां पाक्षिकत्वप्रसंगाच्च· अतः सांगे प्रयोगे समर्थस्यैव काम्यकर्मण्यधिकारः नित्यकर्मणां त्वंगेषु यथाशक्तिन्यायः तानि हि यावज्जीवश्रुत्या याव
ज्जीवं कर्तव्यत्वेन चोदितानि न च यावज्जीवं केनापि सांगः प्रयोगः कर्तुं शक्यते अतो नित्यकर्मसु प्रधानमात्रसमर्थोधिकारी· अंगानि तु यावंति
कर्तुं शक्यंते तावंति कार्याणीति आस्तां बहूक्त्या सूरिभिः पराक्रांतत्वात्· तत्सिद्धं फलस्वाम्यबोधको विधिरधिकारविधिरिति· तदेवं निरूपि
तं चतुर्विधभेदनिरूपणेन विधेः प्रयोजनवदर्थपर्यवसानं मंत्राणां च प्रयोगसमवेतार्थस्मारकतयार्थवत्त्वं न तु तदुच्चारणमदृष्टार्थं· दृष्टे
संभवति अदृष्टस्यान्याय्यत्वात्· न च दृष्टस्य प्रकारांतरेणापि संभवान्मंत्राम्नानमनर्थकं मंत्रैरेव स्मर्तव्यमिति नियमविधिश्रवणात्· साधन
द्वयस्य पक्षप्राप्तौ अन्यतरस्य साधनस्याप्राप्ततादशायां यो विधिः स नियमविधिः यथाहुः विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति· तत्र चान्य
त्र च प्राप्तौ परिसंख्येति गीयते· अस्यार्थः यस्य यदर्थत्वं प्रमाणांतरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः स अपूर्वविधिः यथा यजेत स्वर्गकाम इ
त्यादि यागस्य हि स्वर्गार्थत्वं न प्रमाणांतरेण ज्ञायते किं त्वनेनैव विधिनेति भवत्ययमपूर्वविधिः पक्षे प्राप्तस्य तु यो विधिः स नियमविधिः यथा व्री
हीनवहन्यादित्यादिः अनेन हि विधिनावघातस्य न वैतुष्यार्थत्वं बोध्यते· अन्वयव्यतिरेकसिद्धत्वात् किं तु नियमः स चाप्राप्तांशपूरणं वैतुष्य
स्य हि नानोपायसाध्यत्वात्· यस्यां दशायां अवघातं परित्यज्योपायांतरं ग्रहीतुमारभ्यते तस्यां दशायां अवघातस्याप्राप्तत्वेन तद्विधानात्मकं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्राप्तांशपूरणमेवानेनविधिनाक्रियते· अतश्चनियमविधौ अप्राप्तांशपूरणात्मको नियमएववाक्यार्थः पक्षे अप्राप्ततादशायां अवघातविधानमितियावत् नतु अपूर्वविधाविवात्यंताप्राप्तौयागविधानमिति· उभयस्ययुगपत्प्राप्ताावितरव्यावृत्तिकोविधिः परिसंख्याविधिः यथापंचपंचनखाभक्ष्याइतिइदंहिवाक्यंनभक्षणविधिपरंतस्यरागतःप्राप्तत्वात्· नापिनियमपरं पंचनखापंचनखभक्षणयोर्युगपत्प्राप्तेः पक्षेप्राप्त्यभावात्· अतइदमपंचनखभक्षणनिवृत्तिपरमितिभवतिपरिसंख्याविधिः साचपरिसंख्याद्विविधाःश्रौतीलाक्षणिकीचेति· तत्रात्रह्येवावपंतीत्यत्र श्रौतीपरिसंख्या एवकारेणपवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात्· पंचपंचनखाभक्ष्याइत्यत्रतुलाक्षणिकीइतरनिवृत्तिवाचकपदस्याभावात्· अतएवेयंत्रिदोषात्रिदोषग्रस्ता·दोषत्रयंच· श्रुतहानि रश्रुतकल्पना· प्राप्तबाधश्चेति ·श्रुतस्यपंचनखभक्षणस्यहानात्· अश्रुतापंचनखभक्षणनिवृत्तिकल्पनात्· प्राप्तस्यचापंचनखभक्षणस्यबाधनात् इति· अस्मिंश्चदोषत्रयेदोषद्वयंशब्दनिष्ठं प्राप्तबाधश्चदोषोऽर्थनिष्ठ इतिदिक् तस्मिद्धमंत्रैरेवस्मर्तव्यमितिनियमविध्याश्रयणान्नमंत्राम्नानमनर्थकं· अतश्चयुक्तंमंत्राणांप्रयोगसमवेतार्थस्मारकतयार्थवत्त्वं तत्रयेमंत्रायत्रयत्रपठितास्तेषांतत्रयद्यर्थप्रकाशनंप्रयोजनंसंभवति तदातत्रैवविनियोगः येषांतुनसंभवतितेषांयत्रसंभवति तत्रोत्कर्षःयथा पूषानुमंत्रणमंत्राणामिति· येषांक्वापिनसंभवति तदुच्चारणस्यत्वगत्यादृष्टार्थत्वंसर्वथापितुतेषांनानर्थक्यमिति·॥

॥नामधेयानांविधेयार्थपरिच्छेदकतयार्थवत्त्वं· तथाहि उद्भिदायजेतपशुकामइत्यत्रहि उद्भिच्छब्दोयागनामधेयंतेनचविधेयार्थपरिच्छेदःक्रियते अनेनहिवाक्येनाप्राप्तत्वात्फलोद्देशेनयागोविधीयते यागसामान्यस्यचाविधेयत्वाद्यागविशेषएवविधीयते· तत्रकोसौविशेषइत्यपेक्षायांउद्भिच्छब्दादुद्भिद्रूपोयोयागइति ज्ञायते उद्भिदायागेनेतिसामानाधिकरण्येननामधेयान्वयात् तस्यचयजिनासामानाधिकरण्येन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचित्वेन विशेष ४

नीलोत्पलशब्दवत्· तत्र हि उत्पलशब्दार्थादुत्पलादन्यो नीलशब्दस्य वाच्योर्थोस्ति नीलगुणः लक्षणयातु नीलशब्दस्य द्रव्यपरत्वेन सामानाधि
करण्यं उद्भिच्छब्दस्य तु यज्यवगतयाग— विशेषादन्यो वाच्योर्थोस्ति विशेषवाचित्वात्तस्य अतस्तस्यार्थांतरवाचित्वाभावेन न नामधेयस्य नीलश
ब्दवत्सामानाधिकरण्यं किन्तर्हि वैश्वदेव्यामिक्षेत्यत्रामिक्षाशब्दवत् वैश्वदेवीशब्दस्य हि देवतातद्धितांतत्वात्तस्य च सास्य देवतेति सर्वनामार्थे
स्मरणात्सर्वनाम्नां चोपस्थितविशेषपरत्वं· तत्र कोसौ वैश्वदेवीशब्दोपात्तो विशेष इत्यपेक्षायां आमिक्षायां आमिक्षापदसांनिध्यादामिक्षारू
पो विशेष इत्यवगम्यते· यथाहुः आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणमिति तथा श्रुत्यैवोपपदस
मानार्थः सर्वनाम्ना प्रतीयते तदर्थस्तद्धितेनैव त्रयाणामेकवाक्यतेति तस्माद्यथा वैश्वदेवीशब्दोपात्तविशेषसमर्पकत्वेनामिक्षापदस्य वैश्वदे
वीशब्देन सामानाधिकरण्यं एवं सामान्यस्याविधेयत्वात् यज्यवगतयागविशेषसमर्पकत्वेन नामधेयस्य यजिना सामानाधिकरण्यं तत्सिद्धं
नामधेयानां विधेयार्थपरिच्छेदकतयार्थवत्वं· यथाहुः तदधीनत्वाद्यागविशेषसिद्धेरिति नामधेयत्वं च निमित्तचतुष्टयात् मत्वर्थलक्ष
णाभयाद्वाक्यभेदभयात्तत्प्रख्यशास्त्रात्तद्व्यपदेशाच्चेति· तत्रोद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभया
त्· तथाहि उद्भिच्छब्दस्य गुणसमर्पकत्वे यागानुवादेन तावन्न गुणविधानं युज्यते फलपदानर्थक्यापत्तेः न चानेन वाक्येन फलप्रतिया॥
गविधानं तस्मिंश्च गुणविधानं युज्यते वाक्यभेदापत्तेः नापि गुणफलसंबंधविधानं संभवति परपदार्थविधानेन विप्रकृष्टविधानापत्तेः धा
त्वर्थस्य स्वरूपेण विधानात्· तदुद्देशेन वाऽन्यस्य कस्यचिदभिधानात्· धातोरत्यंतपारार्थ्यापत्तेश्च यज्यानर्थक्यापत्तेश्च· न हि तदानेन क
करणं समर्प्यते गुणस्य करणत्वेनान्वयात्· नापि फलं पशोर्भाव्यत्वेनान्वयात्· अथ गुणफलसंबंधविधाने तु यागस्याश्रयत्वे न संबंध इति चे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न· यजेतेत्यत्राश्रत्ववाचकपदाभावात्· अथसिद्धांतेकरणत्वमिवाश्रयत्वमपिलक्ष्यमितिचेन्न· आश्रत्वापेक्षयाकरणत्वस्यलघुत्वेनतल्लक्ष
णायास्वयुक्तत्वात्· फलायविधीयमानोगुणोयत्रकार— कतामापद्यतेस आश्रयः तत्वंचाश्रयत्वं करणत्वंचनिष्कृष्टाशक्तिरितिलाघवं· किं
चगुणफलसंबंधविधानेकरणीभूतोगुणस्तन्निष्टंवा· करणत्वंचफलोद्देशेनविधेयं· तत्राद्येपक्षेकरणत्वस्यगुणोपसर्ज्जनत्वेनप्रतीतिर्ल्ल
क्षणयैववाच्यात्स्यतृतीयया प्रत्ययार्थत्वात्प्राधान्येनोपस्थितेः यदपि———————————— गुणनिष्ठंकरणत्वंफलोद्देशे
नविधेयं· तदापिफलभावनायाकरणत्वेनान्वययोग्यगुणनिष्ठ करणत्वोपस्थितिर्ल्लक्षणयैववाच्यात्तृतीयाभिहितस्यकरणत्वस्यक्रियान्व
ययोग्यस्यकरणत्वेनान्वयायोग्यत्वात्· करणशब्देनाभिहितंकरणकारकंतत्वेनान्वययोग्यं· नतृतीयाभिहितं· करणशब्दवत्तृतीयोत्प
त्तिप्रसंगात्· अतश्चकरणत्वेनान्वययोग्यगुणनिष्टकरणत्वोपस्थितिर्ल्लक्षणयैववाच्या लक्षणयाचोपस्थितकरणत्वस्यकरणीभूत
स्यवागुणस्ययत्फलभावनायांकरणत्वं तदपिलक्षणयैववाच्यं· श्रूयमाणतृतीययागुणमात्रस्ययागंप्रतिकरणत्वाभिधानात्· अतए
व तत्ररत्नेचतुर्थं करणीभूतगोदोहनादेः पश्वर्थसमभिव्याहारादित्युक्तं अतश्चगुणफलसंबंधविधानेधातोरत्यंतपरार्थ्यादिबहुदोषत्वादु
द्भिच्छब्दस्यगुणसमर्प्पकत्वेगुणविशिष्टकर्मविधानमेवस्वीकार्यं· तथासतिहियजिनालघुभूतंकरणत्वमात्रंलक्ष्यं· उद्भिच्छब्देनचप्रकृत्यंशे
नमत्वर्थमात्रंलक्ष्यमितिगुणफसंबंधविधानाल्लाघवंभवति· धातोरत्यंतपारार्थ्यादिकंतुनभवतेवधात्वर्थस्यैवफलोद्देशेनविधानात्· अत
श्चोद्भिच्छब्दस्यगुणसमर्प्पकत्वेनमत्वर्थंलक्षयित्वागुणविशिष्टंकर्मविधानंस्वीकार्यं उद्भिदूतायागेनपशुंभावयेति· कर्मनामधेयत्वेतुउद्भिच्छब्द
स्यनमत्वर्थेलक्षणामुख्यैववृत्यायजिसामानाधिकरण्येनतस्यान्वयसंभवात्· उद्भिदायागेनपशुंभावयेदितिसंभवतिचमुख्यार्थेलक्षणाआ

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपितुंनयुक्तासंनिकृष्टविधानंतुसमानमेव· नचैवंसोमेनयजेतेत्यत्रापिसोमपदस्ययागनामधेयत्वापातोगुणविधित्वेमत्वर्थलक्षणापत्ते
रितिवाच्यं सोमपदस्यलतायांरूढत्वेनयागनामधेयत्वानुपपत्तेरगत्यातदाश्रयणात् उद्भिच्छब्दस्यतुनैववाच्योर्थः कश्चित्प्रसिद्धः उद्भि
द्यतेनेनेतियोगस्यतुगुणद्रव्ययागेपिफलोद्भेदनकारिणि उपपत्तेः तत्सिद्धम् उद्भिच्छब्दस्यमत्वर्थलक्षणाभयाद्यागनामधेयत्वइतिचित्र
यायजेतपशुकाम इत्यत्रचित्राशब्दस्यवाक्यभेदभयात्कर्मनामधेयत्वं तथाहिनतावदत्रगुणविशिष्टयागविधानंसंभवति दधिमधुपयो
घृतंधानाउदकंतंडुलास्तत्संसृष्टंप्राजापत्यमित्यनेनविहितत्वाद्यागस्यविशिष्टविधानानुपपत्तेःप्राप्तस्यचयागस्यफलसंबंधेगुणसंबंधेच
विधीयमानेवाक्यभेदः अथचित्राशब्दाच्चित्रत्वस्त्रीत्वयोःप्रतिपत्तेःस्त्रीत्वस्यचस्वभावतःप्राणिधर्मत्वात्प्रकृतेदध्यादिद्रव्यकेकर्मणिनि
वेशायोगात्नानेनवाक्येनप्रकृतेकर्मणिगुणविधानंकिंतुप्राणिद्रव्यकेकर्मणितत्रास्यवाक्यस्यानारभ्याधीतत्वात् अनारभ्याधीतानांचप्र
कृतौवाद्विरुक्तत्वादितिन्यायेनप्रकृतिगामित्वात्प्राणिद्रव्यकाणांचयागानांदैक्षस्यचेतरेष्विितिन्यायेनाग्नीषोमीयप्रकृतिकत्वात तदनुवा
देनानेनवाक्येनगुणोविधीयतेदैक्षस्यचज्योतिष्टोमांगत्वेनस्वतंत्रफलाकांक्षाया अभावात् नपशुकामपदंफलसमर्पकंकिंत्वग्नीषोमी
यपश्वर्ज्जुनांगतयाप्राप्तकामनानुवादः तथाचनवाक्यभेद इतिचेन्न तथापिदैक्षानुवादेनचित्रत्वस्त्रीत्वविधानेवाक्यभेदात् विशिष्ट
कारकविधानेपिगौरवलक्षणोवाक्यभेदएव कारकस्यापिप्राप्तत्वेनविशिष्टविधानानुपपत्तेश्च पशुकामपदस्यापिस्वरसतःफलप
रस्यकामनानुवादत्वेआनर्थक्यापत्तेश्च नचनियमतः :पश्वर्ज्जुनकामनाभवति कामनातःप्रागेवकेनचिद्दत्तेनापिपशौतदभावा
त् तथाचपशुकामपदस्यनित्यवच्छ्रवणाबाधः दैक्षस्योत्पत्तिशिष्टपुंस्त्वावरुद्धत्वेनतत्रस्त्रीत्वविधानानुपत्तेश्च आमिक्षायागानुवादेनवा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिनविधानवत् कृष्णसारंगोऽग्नीषोमीय इतिविशेषविहितेन स्वसन्निधिपठितेन च कृष्णसारंगवर्णेनावरुद्धे चित्रत्वस्यानारभ्याधीतत्वेन सा
मान्यशास्त्रेण विधानानुपपत्तेश्च पांचदश्यावरुद्धइव साप्तदश्यविधानं अयमाभूदग्नीषोमीयपश्वनुवादेन चित्रत्वस्त्रीत्वविधानं सारस्वती
मेषीतिवाक्यविहितयागांगमेष्यनुवादेन तु गुणविधानं स्यात् चित्रयेति स्त्रीकारकानुवादेन चित्रत्वमात्रविधानात् नच प्राकृतेन कृष्णसारंगवर्णे
नैराकांक्ष्यान्न चित्रत्वविधानं युक्तमिति वाच्यं उपदिष्टेन चित्रत्वेनातिदिष्टस्य वर्णांतरस्य बाधोपपत्तेरिति चेन्मैवं नहि चित्रयेत्येकेन पदे
न स्त्रीकारकस्योद्देशं कृत्वा चित्रत्वस्य विधानं संभवति एकप्रसरताभंगलक्षणवाक्यभेदापत्तेः उद्देश्यविधेयभावस्यानेकपदसाध्यत्वात् अ
त एव वषट्कर्तुः प्रथमभक्ष इत्यत्र विशिष्टभक्षविधिर्न तु भक्षानुवादेन प्राथम्यविधिरिति उक्तं तृतीये मेष्यनुवादेन चित्रत्वविधाने फलपदान
र्थक्यापत्तेश्च उभयविधाने वाक्यभेदात् प्रकृतस्य च यागस्य फलाकांक्षाया अनिवृत्तेः विश्वजिन्न्यायेन फलकल्पने गौरवं मधुदधित्याद्यु
त्पत्तिवाक्येन एतस्याधिकारवाक्यस्य प्रतिपन्नैकवाक्यताबाधेन वाक्यभेदप्रसंगाच्च चित्राशब्दस्य कर्मनामधेयत्वे तु प्रकृतस्य कर्मणः फला
कांक्षस्य फलसंबंधमात्रकरणान्न वाक्यभेदः प्रकृताया इष्टेरनेकद्रव्यत्वेन चित्राशब्दस्य तत्रोपपत्तेः तत्सिद्धं वाक्यभेदभयाच्चित्राशब्दः कर्म
नामधेयमिति। अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यशास्त्रात् तस्य गुणस्य प्रख्यापकस्य प्रापकस्य शास्त्रस्य विद्य
मानत्वेनाग्निहोत्रशब्दः कर्मनामधेयमिति यावत् तथाहि विधिना तावदेव विधेयं यत्प्रकारांतरेणाप्राप्तं अप्राप्ते शास्त्रमर्थवदिति न्यायादग्नि
होत्रशब्दस्य च गुणविधित्वे यो गुणस्तेन विधेयः स शास्त्रांतरेण प्राप्तः कथमिति चेच्छृणु यदि तावदग्नौ होत्रमस्मिन्निति सप्तमीं समाश्रित्य होमाधा
रत्वेनाग्निर्विधेय इत्युच्यते तदा यदाहवनीये जुहोतीत्यनेनैव प्राप्तत्वाद्विध्यानर्थक्यं अथाग्नये होत्रमस्मिन्निति चतुर्थीसमासमाश्रित्याग्निर

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादेवतानेनसमर्प्यत इतिचेन्न शास्त्रांतरेणप्राप्तत्वात् किंतच्छास्त्रांतरमितिचेत् अत्रकेचित् यदग्नयेचप्रजापतयेचसायंजुहोतीति शास्त्रां
तरेणहोमानुवादेनाग्निप्रजापत्योर्विधानान्नाग्निहोत्रपदंदेवतासमर्पकंनचोभयविधानेवाक्यभेदःपरस्परनिरपेक्षविधानेहिवाक्यभेदःस्या
त् अग्नयेजुहोतिप्रजापतयेजुहोतीतिप्रत्येकंविधिव्यापारात् चशब्दश्रवणात्तुपरस्परसापेक्षस्यैवपदद्वयस्याख्यातान्वयान्नवाक्यभेदः अ
तएवकर्मणिदक्षिणांददातीतिवाक्यविहितदक्षिणानुवादेनगौश्चाश्वश्चाश्वतरश्चगर्दभश्चाजाश्चावयश्चयवाश्चतिलाश्चमाषाश्चतस्यद्वादशश
तंदक्षिणेतिवाक्येनगवादीनांविधानंदशमोक्तंसंगच्छतेपरस्परसापेक्षाणांगवादीनांविधानेनवाक्यभेदाभावात् अन्यथादक्षिणानुवादेना
नेकेषांगवादीनांविधानंनैवसंगच्छते अग्निप्रजापत्योश्चदेवतयोःसतोःसमुच्चयोनतुसमुच्चितयोर्देवतात्वंपृथक्कारकविभक्तिश्रवणात् च
कारार्थस्यविभक्त्यर्थेनान्वयात् तस्याःप्रधान्यात् अतश्चनाग्निषोमादिवदग्निप्रजापत्योर्देवतयोर्देवतात्वमिति अन्येत्वाचार्या आहुः अग्नयेच
प्रजापतयेचसायंजुहोतीतिवाक्येनाग्नेःप्रापकंहोमानुवादेनप्रजापतिमात्रविधानात् नचविनिगमनाविरहादुभयविधानंयुक्तमितिवाच्यं
विधिनाहितदेवविधीयतेयत्प्रकारांतरेणाप्राप्तंतत्रयथानेनवचनेन — सायंकालोनविधीयतेसायंजुहोतीतिवचनांतरेणप्राप्तत्वात् तथा
ग्निरपिनविधीयते अग्निर्ज्योतिरग्निःस्वाहेतिमंत्रवर्णादेवप्राप्तत्वात् मंत्रवर्णस्यापिदेवतासमर्पकत्वमस्त्येव अतएवोपांशुयाजेविष्ण्वा
दीनांमांत्रवर्णिकंदेवतात्वमित्युक्तं नन्वेवंप्रजापतिदेवतयाग्नेर्बाधःस्यात् चतुर्थ्याहिप्रजापतेर्देवतात्वमवगम्यते अग्नेस्तुमन्त्रवर्णिकं
तत्रसास्यदेवतेतिदेवतात्वेतद्धितस्मरणवत् यद्यपिदेवतात्वेचतुर्थी — स्मरणंनास्तिसंप्रदानेचतुर्थीतिसंप्रदानेतस्याःस्मरणात् तथापि
त्यज्यमानद्रव्योद्देश्यत्वंतावद्देवतात्वंतच्चसंप्रदानस्वरूपांतर्गतंत्यज्यमानद्रव्योद्देश्यत्वेसतिप्रतिग्रहीतृत्वस्यसंप्रदानत्वात् अतश्चतुर्थी

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तः संप्रदानैकदेशतयादेवतात्वप्रतीतिरस्त्येवमंत्रवर्णात्तुनदेवतात्वंप्रतीयते किंत्वधिष्ठानमात्रं अतश्चमंत्रवर्णश्चतुर्थीतोदुर्बलः यथा
हुः तद्धितेनचतुर्थ्यावामंत्रवर्णेनवापुनः देवतायाविधिस्तत्रदुर्बलंतुपरंपरमिति अतश्चप्रबलप्रमाणबोधितप्रजापतिदेवतयादुर्बलप्र
माणबोधिताग्नेर्बाधः स्यादितिचेत्सत्यंस्याद्बाधोयदिप्रजापतयेजुहोतीतिकेवलंप्रजापतिविधानंस्यात् विधीयमानस्तुप्रजापतिर्मंत्रवर्ण
प्राप्तमग्निमनूद्यतत्समुच्चितोहोमोद्देशेनविधीयतेसमुच्चितोभयविधानापेक्षयान्यतःप्राप्तमग्निमनूद्यतत्समुच्चितप्रजापतिमात्रविधानेला
घवात् अतश्चनबाधकत्वंनिरपेक्षविधानाभावात् यथाचत्वन्मतेऽग्निप्रजापत्योर्होमोद्देशेनविधानात्तुल्यार्थत्वेनविकल्पेप्रसक्तेप्रजापते
र्नैपाक्षिकमग्निबाधकत्वंसमुच्चयविधानात् एवंमंत्रवर्णप्राप्तमग्निमनूद्यतत्समुच्चितप्रजापतिविधानेपिनबाधकत्वमितितुल्यं यत्तुअग्ने
र्मान्त्रवर्णिकत्वे अग्निर्ज्योतिःसूर्यःस्वाहेतिमिश्रलिंगमंत्रवर्णबलात्सायंहोमस्यद्विदेवत्यत्वापत्तिरितितन्न अग्निसमुच्चितप्रजापतिविधा
नवत्सूर्यसमुचितस्याविधानात्प्रबलंचतुर्थीप्रमाणबोधितेनप्रजापतिनामंत्रवर्णप्राप्तस्यसूर्यस्यबाधितत्वात्· यत्वग्नेर्मान्त्रवर्णिकत्वेप्रजा
पतिविधेरेतेनैववाक्येनसिद्धेर्यदग्नयेचप्रजापतयेचसायंजुहोतियत्सूर्यायचप्रजापतयेचप्रातर्जुहोतिइतिवाक्यद्वयंव्यर्थमितितन्न·भवे
द्व्यर्थंयदिप्रजापतिमात्रविधानंविवक्षितंस्यात्· सायंहोमेअग्नि— सुचितप्रजापतिविधानंप्रातर्होमेसूर्यज्योतिर्ज्योतिःसूर्यःस्वाहेतिमंत्रव
र्णप्राप्तसूर्यसमुचितप्रजापतिविधानंचविवक्षितं· नचैतदेकेनवाक्येनसिद्ध्यति अतोर्थवद्वाक्यद्वयं यत्वग्नेर्मान्त्रवर्णिकत्वेमंत्रवर्णस्याग्नि
ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंजुहोतीतिवाक्येनसायंहोमेविनियुक्तत्वात्· तस्मकाश्यस्याग्नेरपिप्रजापतिसमुचितस्यतत्रैवदेवतात्ववग
ते यदग्नयेचेतिवाक्येसायंशब्दोव्यर्थइति· एवंयत्सूर्यायचेतिवाक्येप्रातःशब्दोपिव्यर्थइति· किंचमंत्रवर्णेनज्योतिष्ट्वगुणविशिष्टस्याग्नेःप्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्नेः संकीर्तनात् केवलस्यैव ४
काशनाद्धि शिष्टस्यैव देवतात्वापातश्च इति तद्रपितं होमानुवादेन देवताद्वयविधानेपि मंत्रवर्णयोर्लिंगाद्देवप्राप्तिसंभवात् तद्विध्यानर्थक्यात्
मिश्रलिंगमंत्रविधि पर्युदस्तयोः प्रतिप्रसवार्थं विधानेपि तद्विधिगतयोः सायंप्रातः शब्दयोरानर्थक्यं विधीयमानयोर्मंत्रयोर्व्यवस्थयैव
प्राप्तिसंभवात् तत्प्रकाश्ययोर्देवतयोर्व्यवस्थितत्वात् अनुवादत्वोक्तिस्तु उभयत्र तुल्या इति मांत्रवर्णिकत्वेपि अग्नेः केवलस्यैव देवतात्वं
न गुणविशिष्टस्य यदग्नये चेति वाक्ये ग्नेः पूर्वाहुतिरित्यत्र च केवलस्यैव देवतात्वावगतेः यथाह्युपांसुयागे विष्ण्वादेर्मांत्रवर्णिकत्वेपि न गुणवि
शिष्टस्य देवतात्वं विष्णुरुपांश्वयष्टव्य इत्यर्थवादे केवलस्यैव संकीर्तनात् तद्वदिति अतश्च मांत्रवर्णिकत्वे दोषाभावाद्देवताद्वयविधाने च गौ
रवापत्तेरन्यतः प्राप्तमग्निमनूद्य समुच्चितः प्रजापतिरेवात्र विधीयते होमानुवादेनोभयविधाने वाक्यभेदप्रसंगाच्च नच चकारश्रवणान्न
वाक्यभेद इति वाच्यं चकारार्थो हि समुच्चयः तं च समुच्चयं यदि चकारः प्राधान्येन ब्रूयात्तदा प्रधानस्यानेकविशेषणासंग्राहकत्वादारुण्यादिविशि
ष्टक्रयविधानइव कारकद्वयसमुच्चयविधाने वाक्यभेदो न भवेत् न च चकारः समुच्चयं प्रधान्येन ब्रूते परोपसर्जनत्वेनैवाभिधानात् अत एव
दशमे भाष्यकारैश्चकारस्य समुच्चयशब्दाद्वैलक्षण्यं प्रतिपादितं समुच्चयशब्दो हि तं प्राधान्येन ब्रूते न चकारः यदि प्राधान्येन ब्रूयात्तदात
त्प्रतिपन्नः समुच्चयः क्रियागुणैः संबध्येत समुच्चयः शोभनः समुच्चयो द्रष्टव्य इतिवत् शोभनश्चद्रष्टव्य इति प्रयोगः स्यात् समुच्चयशब्दवच्च
कारस्य प्राधान्येन समुच्चयवाचित्वे धवखदिरयोः समुच्चय इतिवत् धवखदिरयोश्चेत्यपि प्रयोगः स्यादिति अतश्चकारः समुच्चयं न प्राधान्येन
ब्रूते येन प्रधानस्यैव विधानान्न वाक्यभेदो भवेत् किंतु कारकद्वयोपसर्जनत्वेनैव सतं ब्रूते समुचिता वग्निप्रजापती इति प्रधानद्वयविधाने च वा
क्यभेदः स्यादेव यथाग्रहोद्देशे संमार्गैकत्वविधाने यद्यपि चकारः समुच्च यं प्राधान्येन ब्रूयात्तथापि तस्य कारकद्वयं प्रति प्राप्तमनुपपन्नं वि

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्त्यभिहितस्यकारकद्वयस्यक्रियोपसर्जनत्वेनसमुच्चयोपसर्जनाभावात् कुरंतादिशब्दैरुपस्थितंहि कारकक्रियातो न्येनसंबध्यते कारक
समुच्चयः कारणसमुच्चयइति· विभक्त्यभिहितंतुक्रियर्थे वकारकाणां तथैवान्वयात्· अतश्चकारेणोच्यमानः सकारकोपसर्ज्जनत्वेनो
वोच्यते· कारकद्वयंनचप्रधानंएकोद्देशेनचप्रधानद्वयविधानेवाक्यभेदएव· यथाहुः अनेकपदसंबद्धंयद्येकमपिकारकंतयार्पितदना
दृत्यैप्रत्ययैर्नविधीयते यच्चयथादक्षिणानुवादेनगवादीनामनेकेषांविधानेनवाक्यभेदस्तथाकारकद्वयविधानेपीतितन्न· नहि गोश्वा
श्वश्चेत्यस्मिन्वाक्येदक्षिणानुवादेनगवादयोविधीयंते· उक्तरीत्यावाक्यभेदापत्तेः चकारश्रवणेनकथंचित्तत्परिहारेपिगवादीनामनेकेषां
द्वादशशतसंख्यायाश्चविधानेवाक्यभेदएव· आध्वर्यवशाखायांगौश्चेत्यादेः तस्यद्वादशशतमित्यंतस्यसहश्रुतत्वेनवाक्यैकवाक्यत्वमि
त्युक्तंदशमे अतोनेनवाक्येनोभयविशिष्टादक्षिणाविधीयतेविशिष्टविधानाच्चनवाक्यभेदः अतएवपार्थसारथिमिश्रैर्दशमेतत्रतत्र सोभय
विशिष्टाविधीयते अनेकगवाद्यात्मिकेकादक्षिणाविधीयते इतिचोक्तं नचैवं ऋत्विग्भ्योदक्षिणांददातीत्यस्यानर्थक्यं तस्यानुवादत्वात्·
ऋत्विगसंबंध परत्वाद्वादक्षिणाशब्दसामर्थ्याद्धि ऋत्विजांचसामाध्वर्यादीनांचतत्संबंधःस्यात्· एतद्वाक्यसत्वेचनभवति ऋत्विक्श
स्यब्रह्मादिगतक्रतुगतयजननिमित्तत्वेनचमसाध्वर्यूणांऋत्विक्त्वाभावस्यतृतीये उक्तत्वात्· अतश्चगोश्चाश्वश्चेत्यस्मिन्वाक्येविशिष्टवि
धानान्नवाक्यभेदः यदग्नयेचप्रजापतयेचसायंजुहोतीतितुनविशिष्टविधानंहोमस्याग्निहोत्रंजुहोतीत्यनेनप्राप्तत्वात्· अतश्चहोमानुवादे
नसमुच्चितोभयविधानेवाक्यभेदाग्नेरवापत्तेर्नानेन वाक्येनदेवताद्वयंविधीयते· किंतुमंत्रवर्णप्राप्तमग्निमनूद्यतत्समुच्चितःप्रजापतिर्होमो
द्देशेनविधीयते अतश्चनेदमग्नेःप्रापकंकिंतुमंत्रवर्णएव अतश्चतेनाग्नेःप्राप्तत्वान्नाग्निहोत्रपदंदेवतासमर्पकंकिंतर्हि नामधेयमेवतत्

CC-0. Gurukul Kangri Collection, Haridwar

सिद्धमेतत्तत्प्रख्यशास्त्रादग्निहोत्रशब्दस्य कर्मनामधेयत्वमिति॥ एवं प्रयाजेषु समिदादिदेवतानां समिधः समिधोग्न आज्यस्य व्यन्त्वित्यादिमं
त्रवर्णेभ्यः प्राप्तत्वात्समिधो यजतीत्यादिषु समिधादिशब्दस्तत्प्रख्यशास्त्रात्कर्मनामधेयं॥ यथाहुः विधित्सितगुणप्राप्तिः शास्त्रमन्यद्यतः।
स्विदं तस्मात्तत्प्रापणं व्यर्थमिति नामत्वमिष्यत इति दिक्॥ श्येनेनाभिचरन् यजेतेत्यत्र श्येनशब्दस्य कर्मनामधेयत्वं तद्व्यपदेशात् तेन व्य
पदेश उपमानं तद्धन्यथानुपपत्तेरिति यावत्॥ तथाहि यद्विधेयं तस्य स्तुतिर्भवति तद्यद्यत्र श्येनो विधेयः स्यात्तदार्थवादे तस्यैव स्तुतिः कार्या
न च यथा वै श्येनो निपत्यादत्त एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्त इत्यनेन तत्र श्येनार्थवादेन श्येनः स्तोतुं शक्यः श्येनोपमानेनार्थान्तरस्तुतेः
क्रियमाणत्वात्॥ न च श्येनोपमानेन स एव स्तोतुं शक्यते॥ उपमानोपमेयभावस्य भिन्ननिष्ठत्वात्॥ यदा तु श्येनसंज्ञको यागो विधीयते॥ तदार्थवा
देन श्येनोपमानेन तस्य स्तुतिः कर्तुं शक्यत इति श्येनशब्दस्य तद्व्यपदेशाद्यागनामधेयत्वं॥ तत्सिद्धं निमित्तचतुष्टयान्नामधेयत्वं॥ उत्पत्तिशिष्ट
गुणबलीयस्त्वमपि पृथङ्नामधेयत्वे निमित्तमिति केचिदाहुः वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्दस्य कर्मनामधेयत्वमुत्पत्तिशिष्टगुणबली
यस्त्वात्॥ उक्तमत्वर्थलक्षणादिप्रकारचतुष्टयासंभवात्॥ न तावन्मत्वर्थलक्षणाभयान्नामधेयत्वं वक्तुं युक्तं वैश्वदेवेनेति तद्धितेनैव मत्वर्थस्य या
गस्योक्तत्वात्॥ सास्य देवतेत्यस्मिन्नर्थे हि तद्धितः तस्मरणां तत्रास्य शब्दस्य तद्धितान्तर्गतस्य यद्यपि सूक्तहविषोरिति स्मृतेः सूक्ते हविषि वा मुख्यत्व
मवगतं॥ तथापि सर्वनाम्नामुपस्थितवाचित्वात्॥ सूक्तहविषोश्चात्रानुपस्थितत्वाद्यजेतेत्युपस्थितं यागमेवास्य शब्दोऽभिधत्त इति न यागे म
त्वर्थलक्षणा विश्वेदेवरूपैकदेवताविधानाच्च न वाक्यभेदः नापि तत्प्रख्यशास्त्रान्नामत्वं यत्र हि विधित्सितो गुणोऽन्यतः प्राप्तस्तत्र तत्प्रख्यशास्त्रा
न्नामत्वं॥ यथाग्निहोत्रशब्दे अत्र चाग्नेयादयोऽष्टौ यागाः प्रकृताः तत्रामिक्षायागे यद्यपि विश्वेदेवाः प्राप्ता वैश्वदेव्यामिक्षेति तथापि सप्तसु तेषु तेषा

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मप्राप्तत्वाद्वैश्वदेवेन यजेतेत्यनेन तत्र तद्विधानेन तत्प्रख्यशास्त्रन्यायेन तद्गुणानामत्वं स्यात्· न चामिक्षायागस्यैवैतन्नामेति वाच्यं· वैश्वदे
वेन यजेतेति वाक्यवैयर्थ्यापत्तेः न च वैश्वदेवशब्दस्यामिक्षायागमात्रनामत्वे स एव यागोऽनेनानूद्यत इति वाच्यं· न च तदनुवादे नास्ति किंचि
त्फलं प्राचीनप्रवणे वैश्वदेवेन यजेतेति विधीयमानस्य प्राचीनप्रवणदेशस्य विनापि तद्वाक्यं· आमिक्षायाग एव संबंधोपपत्तेः विश्वेदेवसंबं
धात्तस्य आग्नेयाद्यशेषप्रकृतयागनामधेयत्वे तु न वैश्वदेवेनेति वाक्यानर्थक्यं· तदाह्यनेनाष्टौ यागा अनूद्यन्ते· अनुवादे नैकप्रतीत्यारू
ढत्वात्समुदितानामष्टानामपि वैश्वदेवशब्दो नामधेयं सिद्ध्यति· एवं च प्राचीनप्रवणे वैश्वदेवेन यजेतेत्यत्र वैश्वदेवशब्देनाष्टौ यागाननू
द्य प्राचीनप्रवणविधानं तत्र सिद्धं भवति तद्वाक्यासत्त्वे अनेन वाक्येनामिक्षायाग एव प्राचीनप्रवणदेशसंबंधः स्यात्· अतश्चाष्टसु यागेषु
प्राचीनप्रवणदेशसंबंध एवैतद्वाक्यप्रयोजनं· एवं च वैश्वदेवशब्दोऽष्टानां नामधेयं· न च तत्र तत्प्रख्यशास्त्रं निमित्तं संभवति· सप्तसु वैश्वदे
वादिषु प्राप्तेः आतो न वैश्वदेवशब्दस्य तत्प्रख्यशास्त्रान्नामधेयमिति· नापि तद्व्यपदेशात् तादृशस्य व्यपदेशस्यानुपलंभात्· अतश्च वैश्व
देवशब्दस्य नामधेयत्वे उक्तप्रकारचतुष्टयस्यानिमित्तत्वादुत्पत्तिशिष्टगुणावलीयस्त्वमेव निमित्तं· तथा हि वैश्वदेवेन यजेतेत्यत्र न ताव
दप्रकृतकर्मानुवादेन देवताविधानं संभवति तेषामत्रानुपस्थितेः नापि देवताविशिष्टकर्मान्तरविधानं संभवति गौरवापत्तेः अष्टौ हवींषी
ति अनन्यगतिकलिंगविरोधात्· अतोऽनेन वाक्येन प्रकृतकर्मानुवादेन देवता विधीयत इति वक्तव्यं· तत्रामिक्षायागे विश्वेदेवप्राप्तेः सप्त
सु यागेषु अनेन वाक्येन विश्वेदेवा विधीयन्त इति वक्तव्यं· न च तत्संभवति तेषामुत्पत्तिशिष्टाग्न्याद्यवरोधात् आकांक्षया हि संबंधो भवति
आग्नेयादियागानां हि देवताकांक्षा उत्पत्तिशिष्टैरग्न्यादिभिरेव निवृत्तेति न तत्र विश्वेदेवविधानं युक्तं· अतश्चोत्पत्तिशिष्टगुणावलीयस्त्वा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ह्वैश्वदेवशब्दस्यकर्मनामधेयत्वमितियथाहुः गुणांतरावरुद्धत्वान्नवकाशयोगुणोपरः विकल्पोपिनवैषम्यात्तस्मान्नामैवयुज्यते· अन्येत्वा
चार्याआहुः यः शब्दोयत्रकर्मणियद्गुणसंबंधबोध यतिसचेत्संबंधः शास्त्रांतरप्रतिपन्नस्तदातस्यशब्दस्यतन्नामधेयत्वं तत्प्रख्यशास्त्रत्वा
त्· तच्चशास्त्रांतरंविधिर्वार्थवादोवेति अत्रनादरः तत्राग्निहोत्रशब्देग्निसंबंधबोधकं शास्त्रांतरंविधिरेववैश्वदेवसंबंधंकर्मणिबोध
यतिविश्वेदेवसंबंधश्चाष्टसुयागेषुयत् विश्वेदेवाःसमयजन्ततद्वैश्वदेवस्य वैश्वदेवत्वमित्यर्थवादादवगतः नचविधिरेवतत्प्रख्यशास्त्रंनार्थवा
दइत्यत्रकिंचित्प्रमाणमस्ति· अतएवज्योतिष्टोमेनस्वर्गकामोयजेतेत्यत्रज्योतिष्टोमशब्दस्तानिवाएतानि —— ज्योतींषियएतस्य
स्तोमाइत्यर्थवादावगतंज्योतिःसंबंधंनिमित्तीकृत्यसोमयागेप्रवर्त्तमानस्तत्प्रख्यशास्त्रान्नामधेयंभवति· एवंप्रकृतेपिद्रष्टव्यं पंचमप्र
कारकल्पने प्रमाणाभावात्· अतएववैश्वदेवाधिकरणवार्त्तिककारैरेवमुपसंहृतं· तत्प्रख्यतयैवसर्वेषां — नामधेयत्वमितियच्चोत्पत्ति
शिष्टगुणबलीयस्त्वमुक्तं· तद्गुणविध्यसंभवेयुक्त्याभ्युच्चयमात्र तत्सिद्धंतत्प्रख्यशास्त्राद्वैश्वदेवशब्दस्यकर्मनामधेयत्वमिति· ननुयथा
सोमाधिकरणेऐन्द्रवायवंगृह्णातीत्यादौनयजिकल्पनं सोमेनयजेतेतिप्रत्यक्षयजिश्रुतेरित्युक्तं· तेनन्यायेनवैश्वदेव्यामिक्षेत्यत्रापियजिक
ल्पनंमास्तु· वैश्वदेवेनयजेतेत्यत्रयजिश्रुतेः एवंचानेनवाक्येनदेवताविशिष्टकर्मविधानमस्तु तस्यचद्रव्याकांक्षायांवैश्वदेव्यामिक्षेतिद्र
व्यविधानमस्तु एवंचनवाक्यद्वयस्याप्यनुवादत्वं नाप्यष्टौहवींषीति अनन्यगतिकलिंगविरोधोभवेदिति चेन्मैवं· वैश्वदेव्यामिक्षेतित्यत्र
यज्यकल्पने आमिक्षाकिमनुवादेनविधीयतेइतिवक्तव्यं· विश्वेदेवानुवादेनविधानेद्रव्यस्यदेवतांगत्वमेवस्यान्नयागांगत्वं· किञ्चवैश्व
देवीशब्दोदेवतातद्धितत्वादामिक्षांतर्गतत्वेन —— तत्रविश्वेदेवानुवादेनद्रव्यविधानेवैश्वदेवीशब्देनवकर्त्तव्यं यदश्रुतेः यथाभावना

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यांकरणसमर्पणंधातुनैवक्रियते परश्चतेर्नतूपपदेनेत्युक्तं भावार्थाधिकरणेतद्दत् तत्रचषट्कर्त्तुः प्रथमभक्षइतिवत् एकप्रसरतावि
विरोधः अतोयागानुवादेनापिद्रव्यविधानार्थं वैश्वदेव्यामिक्षेत्यत्रयजिकल्पनंतावदवश्यंकर्त्तव्यं· ततश्चपशुसोमाधिकरणन्यायवैषम्यं।
ऐन्द्रवायवंगृह्णातीत्यत्रदेवताविशिष्टग्रहणविधानेनयज्यकल्पनात् यजिकल्पनेचवैश्वदेव्यामिक्षेत्यत्रैवद्रव्यदेवताविशिष्टकर्मविधानं
युक्तंरूपद्वयश्रवणात्· एवंचाग्नेयोष्टाकपालःसौम्यःचरुरित्यादिवाक्यैर्वैश्वदेव्यामिक्षेत्यस्यवाक्यस्यप्रायःपाठोरक्षितोभवति अन्यथाहिते
षुद्रव्यदेवतासंबंधकल्पितयागविधानं अत्रचद्रव्यमात्रविधानमितिवैरूप्यंप्रसज्जेत किंचवैश्वदेवेनयजेतेत्यत्रवैश्वदेवशब्दस्यदेवतास
मर्पकत्वेयद्विश्वेदेवाःसमयजंतवैश्वदेवस्यतद्वैश्वदेवत्वमित्यंतस्यार्थवादस्यात्यंतमेवनिरालंबनत्वंस्यात् यतएतदर्थवादाद्धिवैश्वदेवकर्तृ
कत्वेकर्मणिप्रवृत्तइतिज्ञायतेतद्देवतासमर्पकत्वेविरुध्यते किंचवैश्वदेवेनयजेतेत्यस्ययागविधित्वेआमिक्षायानोत्पत्तिशिष्टत्वं· तथाचत
यानवाजिनंवाधितुंशक्यतेइत्युभयोरपिआमिक्षावाजिनयोरेकयागांगत्वंस्यात्· तथाचविकल्पःसचाष्टदोषदुष्टइतितस्माद्वैश्वदेव्यामिक्षे।
त्यत्रैवयागविधानं इतरस्यत्वनुवादनं अनुवादत्वेचयथानानर्थक्यंतथोक्तमित्यास्तांतत्· तस्मिद्धंवैश्वदेवेनयजेतेत्यस्यशब्दस्यकर्मना।
मधेयत्वं· तदेवंनिरूपितमत्वर्थलक्षणादिप्रकारचतुष्टयनिरूपणेननामधेयार्थपरिच्छेदकतयार्थवत्वं· दामोदरोजयति· अनर्थहेतुकर्मणः
सकाशात्पुरुषस्यनिवृत्तिकरणत्वेननिषेधानापुरुषार्थानुबंधित्वं·॥ ❈ ॥ तथाहि· एकपक्षस्यानुष्ठानेद्वितीयपक्षवाक्यस्यसतोपिप्रवर्त्तक
त्वस्यानादरः द्वितीयपक्षस्यानुष्ठानेतद्वाक्यस्यानादृतप्रवर्त्तकत्वादनादरः पूर्ववाक्यस्यानुष्ठानेद्वितीयपक्षवाक्यस्यसतोपिप्रवर्त्तकत्वस्यना।
दरःद्वितीयपक्षस्यानुष्ठानेतद्वाक्यस्यद्वितीयपक्षसमयेनादृतप्रवर्त्तकत्वस्यानादरः पूर्ववाक्यस्यादृतप्रवर्त्तकत्वपरित्यागःपुनरपिप्रथम

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षस्यानुष्ठाने तद्वाक्यस्य द्वितीयपक्षसमये नादृतप्रवर्तकत्वस्यानादरः इति वाक्यगाश्चत्वारः अर्थोऽपि एकैकपक्षानुष्ठाने प्रमितस्त्यज्यते कश्चि
द्रनात्यपश्चादाद्रियत इत्यर्थविषयाश्चत्वारो न्यायनिधावुक्ताः इति टिप्पणं तथाहीत्यस्य ॥ तथाहि यथा विधयः प्रेरणामभिदधतः स्वप्रव
र्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयःसाधनत्वमाक्षिपंतः पुरुषं तत्र प्रवर्त्तयंति· एवं नकलंजं भक्षयेदित्यादयो निषेधा अपि निवर्त्तनाम
भिदधतः स्वनिवर्त्तकत्वनिर्वाहार्थं निषेध्यकलंजभक्षणादेरनर्थहेतुत्वमाक्षिपंतः पुरुषं ततो निवर्त्तयंति· ननु कथं निषेधानां निवर्त्तनाप्रतिपा
दकत्वं यावता न भक्षयेन्न हंतव्य इत्येवमादौ अव्यवधानेन नञर्थस्याभावस्य धात्वर्थवर्जनकर्त्तव्यतैव सर्वत्र वाक्यार्थः प्रतीयते ततश्च यजेतेत्या
दौ यागकर्त्तव्यता वाक्यार्थः एवं निषेधेषु तत्तद्धात्वर्थवर्जनकर्त्तव्यता वाक्यार्थो न निवर्त्तनेति चेत् मैवं अव्यवधानेपि धात्वर्थस्य प्रत्ययार्थोपस
र्ज्जनत्वेनोपस्थितस्य नञर्थेनान्वयायोगात्· नह्यन्योपसर्ज्जनमन्येनान्वेति· राजपुरुषमानयेत्यत्र न हि राज्ञ आनयनान्वयित्वं· ततश्चाव्यवधा
नेपि नञर्थस्य न धात्वर्थेनान्वयः आरुण्यस्यैवैकहायिन्या नापि कलिंजादिपदार्थेऽन्वयः तेषामपि कारकोपसर्जनत्वेन भिन्नपदस्य नञर्थे
नान्वयायोगात् एकहायन्या इवारुण्येन अतश्चान्येनान्वयायोगान्नञर्थः प्रत्ययार्थेन संबध्यते तस्य प्राधान्यात् क्रयभावनयेवारुण्या
दीनि तत्रापि नाख्यातांशवाच्यया आर्थ्या भावनया तस्या अपि लिङ्त्वांशवाच्य प्रवर्त्तनोपसर्जनत्वेनोपस्थितत्वात् अतो लिङ्त्वांशेन नञः संब
ध्यते तस्य सर्वापेक्षया प्राधान्यात् नञश्चैष स्वभावो यत्स्वसंबंधिप्रतिपक्षबोधकत्वं नास्तीत्यत्र ह्यस्तीति सत्त्वशब्देन संबध्यमानो नञ् सत्त्वप्रतिप
क्षं असत्त्वं गमयति तदिह लिङर्थस्तावत्प्रवर्त्तना अतस्तेन संबध्यमानो नञ् प्रवर्त्तनाप्रतिपक्षं निवर्त्तनां गमयति विधिवाक्यश्रवणे यं मां प्रव
र्त्तयतीतिवन्निषेधवाक्यश्रवणेऽयं मां निवर्त्तयतीति निवृत्त्यनुकूलव्यापारनिवर्त्तनायाः प्रतीतिरनुभवसिद्धा अतश्च सर्वत्र निषेधेषु निवर्त्तनैव

CC-0. Gurukul Kangri Collection, Haridwar

वाक्यार्थः एवंचविधिनिषेधयोर्भिन्नार्थत्वंसिद्धंभवतिहननादिवर्जनकर्त्तव्यतावाक्यार्थपक्षेतुकर्त्तव्यतायाएवोभयत्रप्रतिपाद्यत्वात्तयोरेका
र्थत्वंस्यात्तच्चनयुक्तं· यथाहुः अंतरंयादृशंलोकेब्रह्महत्याश्वमेधयोः दृश्यतेतादृगेवेदंविधानप्रतिषेधयोरिति· तथा फलबुद्धिप्रमेयाधिका
रिबोधकभेदतः पंचधात्यंतभिन्नत्वाद्भेदोविधिनिषेधयोरितियन्मतेइष्टसाधनत्वंलिङर्थस्तन्मतेलिङ·संसृष्टोनञ् इष्टसाधनत्वप्रतिप
क्षमनिष्टसाधनत्वंगमयतिसर्वथापितुनञः प्राधान्यात्प्रत्ययेनान्वयः यदातुतदन्वयेकिंचिद्बाधकंतदागत्याधात्वर्थेनान्वयः तच्चबाधकंद्विवि
धं तस्यव्रतमित्युपक्रमोविकल्पप्रसक्तिश्च अनेनचबाधकद्वयेननञयुक्तेषुकेषुचिद्वाक्येषुपर्युदासाश्रयणंभवति तदभावेनिषेधएवपर्यु
दासः सविज्ञेयोयत्रोत्तरपदेननञ्प्रतिषेधःसविज्ञेयोक्रिय यासह यत्रनञ् तत्रनेक्षेतोद्यंतमादित्यमित्यादौपर्युदासाश्रयणंतस्यव्रतमित्यु
पक्रमात्· तथाहिव्रतशब्देनकर्त्तव्यार्थउच्यते अतश्चस्नातकस्यकर्त्तव्यत्वेनोपक्रमात्किंतत्कर्त्तव्यमित्यपेक्षायामग्रेनेक्षेतोद्यंतमादित्यादौक
र्त्तव्यएवार्थोवक्तव्य आकांक्षिताभिधानात्· अर्थांतरोक्तौचपूर्ववाक्यस्यसाकांक्षत्वेनाप्रामाण्यप्रसंगात्· नहिकर्त्तव्यार्थवक्तव्यत्वेनोपक्रमे
ग्रेचतदनभिधानेपूर्ववाक्यस्यसाकांक्षत्वेनप्रामाण्यंभवति नचसाकांक्षस्यप्रामाण्यंगौरश्वपुरुषइत्यादावपिप्रसंगात् किंचनेक्षेतेत्यस्यापक्र
मेणाप्रतीयमानाएकवाक्यताचनस्यात्· अर्थांतरोक्तेः अतश्चास्मिन्वाक्येकश्चनकर्त्तव्यएवार्थोवक्तव्यः तदुक्तौचननञः प्रत्ययेनसंबंधोघट
ते तत्संबंधेकर्त्तव्यार्थोक्तेरनुपपत्तेः प्रत्ययाच्चावतारितोनञ्धातुनासंबध्यतेतत्संबंधेचननञः प्रतिषेधकत्वं विधायकसंबंधेनैवतस्यप्रति
षेधकत्वस्यविधायकत्वप्रतिपक्षत्वात्· नामधातुयोगेतुननञः प्रतिषेधकत्वं तयोरभिधायकत्वात्· यथाहुः नामधात्वर्थयोगीतुनैवनञ् राम: २९
प्रतिषेधकः वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनाविति· अतश्चनेक्षेतेत्यत्रनञोधातुयोगान्नजिहासितिभ्यां ईक्षणविरोधीकश्चनार्थः प्रतिपा

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यते॰ ननु तदन्यतद्विरुद्धत्तदभावेषु नञ् इति सत्यपि स्मरणेन नञः स्वसंसृष्टाभाव एव शक्तिः लाघवात्॰ न तदन्यतद्विरुद्धत्वयोः तयोरभावघटि
तत्वेन गौरवात्॰ अनेकार्थत्वस्य चान्याय्यत्वात् अतो नञो धातुयोगे धात्वर्थाभावबोधकत्वमेव न तु तद्विरुद्धार्थबोधकत्वमिति चेत्सत्यं नञो
ऽभाव एव शक्तिः स्मरणं तु प्रतीत्यभिप्रायं॰ नाम धात्वर्थयोगीत्यपि प्रतीत्यभिप्रायं तथापि नेक्षेतेत्यत्र प्रत्ययस्य नञा संबंधात्॰ तेन तावत्क।
श्चिदर्थो विधेयः तत्र न तावद्धात्वर्थो विधातुं शक्यते नञा तदभावबोधनात्॰ नापि तदभावो विधातुं शक्यते अभावस्याविधेयत्वात्॰ अतश्च न
ञिक्षितिभ्यां विधानयोग्यः कश्च नेक्षणविरोधी अर्थो लक्षणया प्रतिपाद्यते स चेक्षणविरोधी लक्ष्यमाणः पदार्थो नेक्षेदित्यनीक्षणसंकल्पः त
स्येक्षणविरोधित्वात् सत्यपि पदार्थांतरस्येक्षणविरोधित्वे सर्वक्रियाविनाभूतत्वेन संकल्पस्यैव लक्षणा स एव नेक्षेतेत्यत्र कर्त्तव्यतया विधीयते
अनीक्षणसंकल्पेन भावयेदिति भाव्याकांक्षायां च एतावता हेनसा वियुक्तो भवतीति वाक्यशेषावगतः पापक्षयो भाव्यतया संबध्यते॰ एवं चात्र पा
पक्षयाय संकल्पस्य कर्त्तव्यतया विधानात्तस्य व्रतमित्यनेनैकवाक्यता सिद्धा भवति॰ तत्सिद्धं नेक्षेतेत्यत्र तस्य व्रतमित्युपक्रमात् पर्युदासाश्रयण
मिति॰ नानुयाजेषु येयजामहं करोतीत्यत्र विकल्पप्रसक्त्या तदाश्रयणं तथाहि यद्यत्र प्रधानसंबंधलाभान्नञः प्रत्ययसंबंधः स्वीक्रियेत तत या
सत्यनेन वाक्येनानुयाजेषु येयजामहः प्रतिषिध्यत इति वक्तव्यं अनुयाजेषु येयजामहं न कुर्यादिति न च तत्र तस्य प्रतिषेधः प्राप्तिं विना सं
भवति प्राप्तिसापेक्षत्वात्प्रतिषेधस्य अत एव नांतरिक्षे न दिवीत्यस्य न प्रतिषेधकत्वं अंतरिक्षे चयनाप्राप्तेः अत एव ब्राह्मणो न हंतव्य इत्यस्य नित्य
वद्धननिवर्त्तकत्वं न स्यात् सर्वो हि पुरुषः कदाचिद्धननादौ प्रवर्त्तते कदाचिद्रागाद्यभावेन प्रवर्त्तते॰ तत्र यदि निषेधस्य प्राप्तिसापेक्षत्वं न स्यात्॰
तदा रागाविरोधाय हननादावप्रवृत्ते प्रत्येव शास्त्रप्रामाण्योपपत्तौ रागादिना हननादौ प्रवृत्ते न पुंसा न ततो निवर्त्तितव्यं प्राप्तिसापेक्षत्वे तु स्वयमप्र

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रागादिनाप्रवृत्तप्रसेवभ्रांतिनिमित्तरागबाधेनैवनिषेधशास्त्रप्रवृत्तेः १

वृत्तंप्रति प्रशक्त्यभावेननिषेधशास्त्राप्रवृत्तेः युक्ताप्रवृत्तस्यततोनिवृत्तिः अतश्चब्राह्मणोनहंतव्यइत्यस्यनिषेधस्यनिवृत्तिनियमबोधकत्वं· व्रीहीनवहन्यादित्यस्येवावघातनियमबोधकत्वं यथाखलुव्रीहीनवहन्यादितिशास्त्रंवैतुष्यार्थं अवघातेस्वप्रवृत्तंपुरुषंप्रतिनप्रवर्त्तते वैयर्थ्यात् किंतु दलनादौप्रवृत्तंप्रति एवंनहन्यादितिशास्त्रंहननात्स्वयंनिवृत्तंपुरुषंप्रतिनप्रवर्त्तते वैयर्थ्यात् किंतुहननेप्रवृत्तंपुरुषंकर्त्तव्यत्वेनप्रशक्तस्य प्रतिषेधात् यत्कर्त्तव्यंतन्नेति अतश्चप्राप्तिसापेक्षत्वात्प्रतिषेधानां अनुयाजेषुयेयजामहप्रतिषेधे तस्यतत्रप्राप्तिर्वक्तव्यासानतावद्वननादाविवरागतःसंभवति अतोयजतिषुयेयजामहंकरोतीतिशास्त्रात्सावक्तव्या शास्त्रप्राप्तस्यचप्रतिषेधेविकल्पःस्यात् शास्त्रेणभ्रांतिनिमित्तरागस्येवशास्त्रांतरस्यात्यंतबाधायोगात् नचपदशास्त्रेणाहवनीयशास्त्रस्येवनानुयाजेष्वितिविशेषशास्त्रेणयजतिषुयेयजामहंकरोतीतिसामान्यशास्त्रस्यबाधःस्यादितिवाच्यं· शास्त्रयोर्हितत्रबाध्यबाधकभावोयत्रपरस्परनिरपेक्षतानहिपदशास्त्रस्यस्वार्थविधानार्थमाहवनीयशास्त्रापेक्षास्तिनिषेधशास्त्रस्यतुप्रशक्त्यर्थंयजतिषुयेयजामहंकरोतीतिविधेरस्त्यपेक्षा एवंचनिषेधशास्त्रस्यविशेषविषयत्वेनप्राबल्यवत् विधिशास्त्रस्याप्युपजीव्यत्वेनप्राबल्यमस्तीतिननिषेधेनविधेरत्यंतबाधोयुक्तइतिविहितप्रतिषिद्धत्वाद्विकल्पःस्यात् सचनयुक्तःविकल्पेहिपक्षेशास्त्रस्याप्रामाण्यंभवति नह्यनुयाजेषुयेयजामहंकरणे नानुयाजेष्वित्यस्यप्रामाण्यंसंभवति व्रीह्याद्यनुष्ठानसमयइवयवशास्त्रस्यद्विरदृष्टकल्पनाचस्यात् विधेर्हिएवंज्ञायते यत् अनुयाजेषुयेयजामहंकरणेकश्चनोपकारोभवतीति निषेधाच्चतदकरणादितिज्ञायते।

अनृतवदनाकरणादिवद्दर्शपूर्णमासयोःकश्चिदुपकारःक्रियतइति सचोपकारोदृष्टरूपइतिद्विरदृष्टकल्पनाप्रसंगः अतश्चविकल्पोनयुक्तः प्रतिषेधाश्रयणेचतदापत्तेर्नतदाश्रयणं किंतुतत्रः अनुयाजशब्देनसंबंधमाश्रित्यपर्युदासआश्रीयते नञनुयाजशब्दाभ्यामनुयाजव्यति

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिक्तलक्षणात् अनुयाजव्यतिरिक्तेषु येयजामहं करोतीति अत्रत्वनाकेयेयजामहः कर्त्तव्यतयानविधीयते यजतिषु येयजामहंकरोतीत्य
नेनैवविहितत्वात् किंतुसामान्यशास्त्रविहितयेयजामहानुवादेनतस्यानुयाजव्यतिरिक्तविषयताविधीयते यत् यजतिषु येयजामहंकरो
ति तदनुयाजव्यतिरिक्तेषु एवंसामन्यशास्त्रस्यविशेषापेक्षिणः नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्तविषयसमर्पणादनुयाजव्यतिरि
क्तेषु येयजामहः कत्तव्यतयाप्राप्तः अनुयाजेषुस नकर्त्तव्यतयाप्राप्तोनवाप्रतिषिद्ध इतिनविकल्पः लक्षणयाचानुयाजव्यतिरिक्तविषयसम
र्पणान्नानुयाजेष्वितिवाक्यस्यनाप्रामाण्यं अतश्चपर्युदासाश्रयणेनकिंचिद्बाधकंतस्सिद्धंनानुयाजेष्वितिवाक्येविकल्पभयात्पर्युदासाश्रय
णमितिः ननुपर्युदासा श्रयणेयजतिषु येयजामहं करोतीतिशास्त्रेणयागसामान्येप्राप्तस्य येयजामहस्यनानुयाजेष्वित्यनेनानुयाजव्यतिरि
क्तेसंकोचनात्पर्युदासस्योपसंहारादभेदः स्यादिति उपसंहारेहि सामान्यप्राप्तस्यविशेषेसंकोचोभवति यथापुरोडाशंचतुर्द्धाकरोतीति पुरोडाश
सामान्ये प्राप्तंचतुर्द्धाकरणं आग्नेयंचतुर्द्धाकरोतीति अनेनसंकोच्यते इतिचेन्न तन्मात्रसंकोचार्थत्वादुपसंहारस्य तदन्यमात्रसंकोचार्थत्वात्प
र्युदासस्य इतिकेचित् अन्येतु उपसंहारोनामसामान्यतः प्राप्तस्यविशेषेसंकोचनरूपोव्यापारविशेषोविधेः पर्युदासः सविज्ञेयोयत्रोत्तरपदेननत्र
ञ् इत्यभियुक्तोक्त्याप्रत्ययातिरिक्तेनधातुनावानाम्नावानञः संबंधः पर्युदासः अत अनयोस्तावत्स्वरूपतः स्पष्टएवभेदः एवंसत्यभेदः आशं
क्येतयदियत्रपर्युदासस्तत्रावश्यमुपसंहारः स्यात् नचैतदस्तिनेक्षेतोद्यंतमित्यादौसत्यपितस्मिन्नुपसंहाराभावात् नहितत्राग्नेयंचतुर्द्धाकर
णमिवसामान्येप्राप्तंकिंचिद्विशेषेसंकोच्यते पापक्षयोद्देशेनानीक्षणसंकल्पमात्रविधानात् प्रकृतोदाहरणेतु यजिसामान्येप्राप्तस्य येयजाम
हस्यानुयाजव्यतिरिक्तेसंकोचनाद्यजिविधेरुपसंहारविधित्वंभवतिनैतावताकिंचिद्विरुद्ध्यते विद्ध्याभावेहिकथंविधिकार्यमुपसंहारः पर्युदासेन

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियतइतिभवतिविरोधः नचात्रविधिर्नास्ति नञोनुयाजपदसंबंधेनविधेर्विधायकत्वस्याव्याघातात्· अत्रहिपर्युदासोऽनुयाजव्यतिरिक्त
विषयसमर्पकः आग्नेयपदवत् उपसंहारकस्तुविधिरेव नचात्रतन्मात्रसंकोचाभावान्नोपसंहारइतिवाच्यं· तन्मात्रसंकोचइतिकोर्थः आ
ग्नेयमात्रेसंकोचःसामान्यप्राप्तस्यविशेषमात्रेसंकोचोवा आद्येऽनारभ्याधीतसाप्तदश्यस्यमित्रविंदादिप्रकरणस्थेनवाक्येनोपसंहारोनस्यात्।
आग्नेयेसंकोचाभावात्· द्वितीयेचतुर्द्धाकरणस्यपुरोडाशमात्रेप्राप्तस्याग्नेयेसंकोचवत् अनुयाजानन्तुयाजसाधारण्येनप्राप्तस्यानुयाजेषुसंको
चादुपसंहारःस्यादेव एतावांस्तुविशेषः आग्नेयादिवाक्येषु आग्नेयपदयोविशेषाःस्वपदोपस्थापकाः प्रकृतेतुपर्युदासे नतस्योपस्थितिरिति।
उपसंहारन्यायस्त्वविशिष्ट एवयच्चतदन्यमात्रसंकोचनार्थत्वात्पर्युदासस्येतितन्न· नेष्टतेत्यत्रसत्यपिपर्युदासेसंकोचाभावात्· नह्यत्रसामा
न्येप्राप्तंतदन्यमात्रेसंकोच्यतेसंकल्पमात्रविधानादित्युक्तमित्यास्तांतावत् तत्सिद्धंनानुयाजेष्वित्यत्रविकल्पप्रशक्त्यापर्युदासाश्रयणमिति।
यत्रतुसआश्रयितुंनशक्यते तत्रतत्प्रशक्तावपिनिषेधआश्रीयते· यथानातिरात्रेषोडशिनंगृह्णातीत्यत्रह्यतिरात्रेषोडशिनंगृह्णातीतिशा
स्त्रप्राप्तमितिरात्रेषोडशिग्रहणंप्रतिषिध्यतेइति विहितप्रतिषिद्धत्वात् विकल्पप्रशक्तावपिपर्युदासोनाश्रीयतेऽशक्यत्वात्· यदिह्यत्रनञः
षोडशिपदेनसंबंधःस्वीक्रियेत तदाअतिरात्रेषोडशिव्यतिरिक्तंगृह्णातीतिवाक्यार्थःस्यात्· तत्रचातिरात्रेषोडशिनंगृह्णातीतिप्रत्यक्षविधि
विरोधः एतएवातिरात्रपदेननञःसंकोचःऽतिरात्रेषोऽडशिनंगृह्णातीतिप्रत्यक्षविधिविरोधात्· अतश्चात्र —— पर्युदासस्यानुपपत्तेर्नि
षेधएवस्वीक्रियतेविकल्पोपिस्वीक्रियते अनन्यगते अतश्चैतत्सिद्धंयत्रतस्यव्रतमित्याद्युपक्रमः विकल्पप्रशक्तिश्च नास्तितत्रप्रतिषेधो। रामः
यथानकलंजंभक्षयेदिति यत्रवाविकल्पप्रशक्तावपिपर्युदासोआश्रयितुंनशक्यते तत्रप्रतिषेधः यथानातिरात्रेषोडशिनंगृह्णातीति एतावां ३१

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तुविशेषः यत्रविशेषः यत्रविकल्पापादकः प्रतिषेधः तत्रप्रतिषिध्यमानस्यनानर्थहेतुत्वं। उभयोरपिविधिनिषेधयोः क्रत्वर्थत्वात् यत्र
तुनविकल्पः प्रसज्यतेप्राप्तिश्चरागतः प्रतिषेधश्चपुरुषार्थस्तत्रनिषिध्यमानस्यानर्थहेतुत्वं। यथाकलंजभक्षणास्यदीक्षितोनददातिन
जुहोतीत्यादिषुतुदानहोमादीनांशास्त्रप्राप्तावपिपुरुषार्थत्वेनप्राप्तत्वात्क्रत्वर्थत्वेनचप्रतिषेधात्तुल्यार्थत्वाभावेनविकल्पाप्रशक्तावपिन
तेषामनर्थहेतुत्वं। रागतः प्राप्त्यभावात्। रागतः प्राप्तस्यापिक्रत्वर्थत्वेनप्रतिषेधे तदनुष्ठानात्क्रतोर्वैगुण्येनानर्थहेतुत्वापत्तिः। यथास्वस्तु
पगमनादिप्रतिषेधो। रागतः प्राप्तस्यपुरुषार्थत्वेनप्रतिषेधेनिषिध्यमानस्यानर्थहेतुत्वमितिदिक्। तत्सिद्धंनिषेधानांपुरुषार्थानुवंधित्वं· एवं
सर्वस्यापिवेदस्यपुरुषार्थानुवंधित्वं॥ ———————— प्रकृतमनसरामः तदेवंयथाविध्यादीनामध्ययनविध्युपातानांनानर्थक्यं एवमर्थवा
दानामपितदुपात्तत्वेनानर्थक्यानुपपत्तेः स्वार्थप्रतिपादनेचप्रयोजनाभावात् लक्षणयाप्रयोजनवदर्थपर्यवसानंवक्तव्यं· तेचार्थवादाद्विविधाः
विधिशेषानिषेधशेषाश्चतत्रवायव्यंश्वेतमालभेतेत्यादिविधिशेषाणांवायुर्वैक्षेपिष्ठादेवतादीनामर्थवादानांविधेयार्थस्तावकतयार्थवत्त्वं।
वर्हिषिरजतंनदेयमित्यादिनिषेधशेषाणांसोरोदीदित्यादीनामर्थवादानांतुनिषेध्यनिंदकतयेति अतश्चलक्षणयाप्राशस्त्यमप्राशस्त्यंचस्वस
न्निधिपठितविधिनिषेधायेक्षितत्वात्स्वार्थप्रतिपादनेप्रयोजनमलभमानैरर्थवादैर्बोध्यते तच्चप्राशस्त्यज्ञानंशब्दभावनायामितिकर्त्तव्यतात्वेनसं
वध्यते परमप्रकृतमनुसरामः तत्सिद्धंवस्यभाणार्थभावनाभाव्यकालिङादिज्ञानकरणिकाप्राशस्त्यज्ञानेतिकर्त्तव्यताकाशाब्दीभावनालिङ्त्वांशे
नोच्यतेइति। ननुकेयंशाब्दीभावनाउच्यतेपुरुषप्रवृत्त्यनुकूलोव्यापारविशेषः सएवविध्यर्थः लिङादिश्रवणेऽयंमांप्रवर्त्तयतीतितस्यनियमेन
प्रतीतेः यत्तुइष्टसाधनत्वंविध्यर्थइतितन्न· तथासतिइष्टसाधनमितिशब्दस्यविधिशब्दः पर्यायःस्यात् नचपर्यायत्वंयुज्यतेसंध्योपासनंतेइष्टसा

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वंकुर्विति सहप्रयोगात् पर्यायाणांचसहप्रयोगाभावात् अतश्चव्यापारविशेषएवविध्यर्थः सचलोके पुरुषनिष्ठोभिप्रायविशेषः वेदेतुपुरुषा
भावाच्छब्दनिष्ठएवप्रेरणापरपर्यायइत्युक्तं ननुलोके शब्दनिष्ठप्रेरणापरपर्यायव्यापारशब्दप्रयोगाभावेनशक्तिग्रहाभावात् कथंतस्यविधि
शब्द[प्र]तीतिरितिचेत्सत्यमेतत् तथापिवालस्तावत्स्तनपानादौस्वकृतरोदनादिजनितमातृप्रवृत्तेःस्वाभिप्रायरूपप्रवर्त्तनाज्ञानजन्यत्वावधा
रणात्तद्विधिकप्रयोजकवाक्यश्रवणसमनंतरभाविनींप्रयोज्यवृत्तिमुपलभ्यतत्कारणत्वेनतस्यप्रवर्त्तनाज्ञानमनुमिमीते यद्यपिभोजनादौस्व
प्रवृत्तेःसमीहितसाधनताज्ञानपूर्वकत्वात्प्रयोज्यवृद्धप्रवृत्तेरपितत्पूर्वकत्वाध्यवसानंयुक्तं तथाप्यन्यप्रेरितप्रवृत्तौप्रवर्त्तनाज्ञानजन्यत्वस्या
क्रमात्प्रवृत्तौदर्शनेनप्रयोज्यवृद्धप्रवृत्तेरपि अन्यप्रेरितप्रवृत्तित्वात्तत्कारणत्वेनप्रवर्त्तनाज्ञानस्यैवाध्यवसानं तच्चप्रवर्त्तनाज्ञानमन्वयव्यति
रेकाभ्यांप्रयोजकवाक्यजन्यमित्यवधारयति तत्रचावापोद्वापाभ्यांप्रवर्त्तनायांविधिशक्तिमवधारयति प्रवृत्त्यनुकूलोव्यापारःप्रवर्त्तनासचव्या
पारःप्रेषादिरूपोविविधइतिप्रत्येकंव्यभिचारित्वाद्विधिशब्दवाच्यत्वानुपपत्तेःप्रवर्त्तनासामान्यमेवविधिशब्दवाच्यमितिकल्पयति एवंचविधि
श्रवणेप्रेषादिरूपस्यवक्त्रभिप्रायस्यप्रवर्त्तनात्वेनैवरूपेणप्रतीतिर्नविशेषरूपेणतथैवशक्तिग्रहात् विशेषरूपेणतुप्रतीतिर्लक्षणयैव एवंच
वैदिकलिङादिश्रवणेपिप्रवर्त्तनासामान्यमेवप्रतीयते तत्रकोसौव्यापारइत्यपेक्षायांप्रेषादिरूपस्यवक्त्रभिप्रायस्यापौरुषेयेवेदेनुपपत्तेःशा
ब्दनिष्ठएवप्रेरणापरपर्यायःकश्चिद्व्यापारइतिकल्प्यते अतश्चशब्दनिष्ठएवप्रेरणापरपर्यायोव्यापारःशाब्दीभावनासैवचप्रवर्त्तनात्वेनरूपेण
विध्यर्थइति अयमेवचार्थोऽभिधाभावनामाहुरन्यामेवलिङादयइतिवार्त्तिकस्य अभिधीयतेऽनेनेतिव्युत्पत्त्याभिधाशब्देनशब्द उच्यते तद्व्या
पारात्मिकाभावनालिङादिवाच्येतिकेचिदाचार्याः अन्येत्वाहुःसत्यंप्रवर्त्तनासामान्यंविध्यर्थः तथैवशक्तिग्रहात् प्रवृत्त्यनुकूलःव्यापारःप्रव

CC-0. Gurukul Kangri Collection, Haridwar

नाति[illegible]तत्सिद्धं यजेतेत्यत्र लिङ्त्वांशेन शाब्दी भावनोच्यते इति आख्यातांशेन चात्रार्थी भावनोच्यते ननु केयमार्थी भावना कर्तृव्यापार इति चेन्न
नय[illegible]पितद्व्यापारत्वेन भावनात्वापत्तेः न चेष्टापत्तिः तस्य प्रकृत्यर्थत्वेन प्रत्ययार्थत्वाभावादिति चेदत्राहुः सत्यं न यागो भावना किंतु स्वर्गे [illegible]
ज[illegible]गविषयो यः प्रयत्नः सा भावना स एव चाख्यातांशेनोच्यते यजेतेत्याख्यातश्रवणे यागे यजेतेति प्रतीतेर्जायमानत्वात् यश्च यत्नपूर्वं
कं गम[illegible]इ करोतीति तस्मिन्देवदत्तो गमनं करोतीति प्रयोगदर्शनात् वातादिना स्यंदमाने तु नायं करोति किंतु वातादिनास्य स्यंदो जायते इति प्रयोगा
त्करोत्यर्थस्तावत्प्रयत्नः करोति सामानाधिकरण्यञ्चाख्यातेदृश्यते यजेत यागेन कुर्यात् पचति पाकं करोति गच्छति गमनं करोति इति अतश्च क
रोति सामानाधिकरण्यात्प्रयत्नस्याख्यातवाच्यत्वं नच रथो गच्छतीति प्रयोगानुपपत्तिः रथे यत्नाभावादिति वाच्यं वोढुर[illegible]गतं प्रयत्नं रथे आरोप्य
प्रयोगोपपत्तेः यन्मतेप्यन्योत्पादानुकूलं व्यापारसामान्यं भावना तन्मतेपि रथे गमनातिरिक्तव्यापारानुपलब्धेः रथो गच्छतीति प्रयोगस्यौपचा
रिकत्वमेवेति अतश्च प्रयत्न एवार्थी भावना यथाहुः प्रयत्नव्यतिरिक्तार्थभावना तु न शक्यते वक्तुमाख्यातवाच्येह प्रस्तुते तु परम्यत इति आ
न्ये त्वाहुः भवितुर्भवनानुकूलो भावकव्यापारस्त्वावद्भावना यस्मिन्व्यापारे कृते करणं फलोत्पादनाय समर्थं भवति तादृशव्यापार इति यावत् स ए
वचाख्यातार्थः कुठारेण छिनत्ति इत्याख्यातश्रवणे हि भवत्येतादृशी मतिः कुठारेण तथा व्याप्रियेत यस्मिन् व्यापारे कृते कुठारेण छेदनं भवतीति
एवं यजेत स्वर्गकाम इत्यस्यायमर्थः यागेन तथा व्याप्रियेत यस्मिन्व्यारे कृते यागात्स्वर्गो भवतीति स च व्यापारः क्वचिदुद्यमननियतनादिः क्वचिच्चा
ग्न्याधानादिब्राह्मणतर्पणान्तः कथंभावाकांक्षायां विशेषरूपेण पश्चादवगम्यते अन्योन्य[illegible]ज्ञानुकूलत्वेन समान्यतस्त्वाख्यातदेवावगम्यते
रथो ग्रामं गच्छ[illegible]ख्यातेन ग्रामप्राप्त्यनुकूलो व्यापार एव प्रतीयते रथस्तथा गमने[illegible]व्याप्रियते यस्मिन्व्यापारे कृते गमनाद्ग्रामप्राप्तिर्भवती

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Gurukul Kangri Collection, Haridwar

श॰ [illegible] प्रतीतिरिति चेत्समतत् [illegible]
णा [illegible] क प्रयोजकवा [illegible]
Digitized by Arya Samaj Foundation Chennai and eGangotri
र्तना अपौरुषेये च वेदे प्रैषादेरसंभवात्कश्चित्पुरुषप्रवृत्त्यानुकूलो सौ व्यापार इत्यपेक्षायां धात्वर्थगतं समीहितसाधनत्वमेवेति कल्प्यते तस्या
पि स्वप्रवृत्त्यनुकूलत्वात् सर्वो हि समीहितसाधनतां ज्ञात्वा प्रवर्त्तते अन्यप्रेरितोपि यदीष्टसाधनतां न जानाति तदा नैव प्रवर्त्तते स्वतंत्रप्रेरणा
वादेपि तदासिन्न समीहितसाधनताज्ञाने स्वीक्रियते एवान्यथा विधेः प्रवर्त्तकत्वानुपपत्तेः अतश्चावश्यकत्वात्समीहितसाधनतैव प्रवर्त्तनात्वेन
रूपेण विध्यर्थः एवं च विधिशब्दस्य परनिष्ठव्यापारबोधकत्वं लोकसिद्धं भवति किं च शब्दे एको व्यापारः स्पंदाद्यतिरिक्तः कल्पनीयः तस्य च स्वप्र
वृत्तौ पराधीनप्रवृत्तौ वा करणत्वेनाक्लृप्तस्य प्रवर्त्तनात्वेन रूपेण ज्ञातस्य प्रवृत्त्यनुकूलत्वं। शब्दस्य च परनिष्ठव्यापारज्ञापकत्वेन क्लृप्तस्य स्व
निष्ठव्यापारबोधकत्वं विधेश्च प्रवर्त्तकत्वनिर्वाहार्थं धात्वर्थस्य समीहितसाधनत्वमिति कल्पनाद्वरमावश्यकस्यैव समीहितसाधनत्वस्य स्व
प्रवृत्तिहेतुत्वेन क्लृप्तस्य प्रवर्त्तनारूपेण विध्यर्थत्वकल्पने लाघवात् अन्यनिष्ठत्वाच्च न च विधेः प्रवर्त्तकत्वनिर्वाहार्थं समीहितसाधनत्वक।
ल्पनात् प्रेरणानभिधाने च विधेरप्रवर्त्तकत्वात् धात्वर्थस्य समीहितसाधनत्वकल्पकमेव नास्तीति वाच्यं प्रवर्त्तनाभिधानेन एतन्मतेपि विधेः
प्रवर्त्तकत्वात् विध्यभिहितस्य च प्रवर्त्तनासामान्यस्य विशेषमंतरेणापर्यवसानात्समीहितसाधनत्वाक्षेपकत्वात् न चेष्टसाधनत्वस्य विध्यर्थत्वे
संध्योपा[illegible]सनं ते इष्टसाधनं तत्वं कुर्विति सह प्रयोगानुपपत्तिरिति वाच्यं इष्टसाधनत्वस्य विशेषरूपेण विधिनानभिधानात् प्रवर्त्तनात्वेन रूपेण
भि[illegible]सामान्यशब्दस्य च विशेषशब्देन दृष्टः सह प्रयोगः पांचालराजाद्रुपद इत्यादौ तस्मात्समीहितसाधनतैव प्रवर्त्तनात्वेन रूपेण विध्य
र्थः स[illegible]नेन रूपेण शब्देनैवाभिधीयते इति शाब्दी भावना उक्तवार्त्तिकस्याप्ययमेवाभिप्रायः अभिधीयते साभिधा समीहितसाधनता सैव प्रवर्त्तना
भिहिता पुरुषप्रवृत्तिं भावयतीति भावना तां लिङादय आहुरिति [illegible] प्रवर्त्तकः प्रवर्त्तिते तद्धर्मे [illegible]
[illegible] योग्यापर्योत्तरावांतरदे [illegible]
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[illegible]

सिहितापुरुषप्रवृत्तिं भावयतीति भावना तां लिङादय आहुरिति यथाहुः ... [illegible]

... तांर इस्य ... यापूर्वोत्तरावांतरदे

... तस्य धातुना ...

... वाणप्रदेशाना ... ज्योत्तरेणासंयुज्य ... ने प्रयोगात् उद्यम्य निपात्य कुठारेण

... त्रापि देवदत्तस्तथा व्याप्रियते यथा प्रयत्नो भवति इति ... नानुकूलो व्यापार एवाख्यातार्थो न तु

... पाकांक्षायां च इक्कादिः पश्चादवगम्यते उद्यमन निपतन वत् तथा च सर्वत्रानुगतत्वादन्योत्पादानु

... प्रयत्नमात्रं र्योग क्षतिदेवदत्तः प्रयतते इत्यादिषु तदभावात् न चात्रौपचारिकत्वं वक्तुं युक्तं मुख्यमे

... र्थोऽप्यन्योत्पादानुकूलो व्यापार एव न प्रयत्नमात्रं करोतेश्चैतेनाचेतनेकर्तृकाख्यातसामानाधिकर ...

... णो आर्थीभावना इति सैव च यजेतेत्याख्यातांशेनोच्यते भावयेदिति तस्याश्च भाव्याकांक्षायां स्व ...

... ः करणत्वेन संबध्यते प्रयाजादयो इतिकर्तव्यतात्वेन एवं च यजेतेत्यादिना स्वर्गाद्युद्देशेन ...

... स्य वेदेन विहितत्वादिति सोयं धर्मो यदुद्देशेन विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः श्रीगोविं ...

... र्पणबुद्ध्यानुष्ठाने प्रमाणाभावः यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि ...

... देस्मृतिवत्प्रामाण्यादिन्यत्र विस्तरः क्वाहं मंदमतिः क्वेयं प्रक्रिया भाद्दसंमता तस्माद्भक्ते ...

पारः सुशोभनः अनेन प्रीयतां देवो गोविंदो भक्तवत्सलः इति श्री अनंतदेवसूनुना आ ...

मीमांसाप्रकरणं समाप्तिमगमत् ॥ ❁ ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्द प्रतीतिरितु चत्तस्य

कप्रयोजक

र्तना अपौरुषेयत्वचवदप्रेषा

पिस्वप्रवृत्त्यनुकूलत्वात्

वादेपि तदाक्षिप्तसमीहि

रूपेणाविध्यर्थः एवंचवि

वृत्तौपराधीनप्रवृत्तौवा

निष्टव्यापारबोधकत्वं

प्रवृत्तिहेतुत्वेनल्कृप्त

ल्पनात् प्रेरणानभि

प्रवर्तकत्वात् विध्यभिहि

संध्योमनंतेइष्टसाधानं

भि सामान्यशब्दस्य

र्थःस्ये नेनरूपेणाशब्देनवाभि

भिहितापुरुषप्रवृत्तिंभावयतीतिभावेनातोलिङादय

नत्वमेवेतिकल्प्यते तस्य

नैवप्रवर्तते स्वतंत्रप्रेरणा

हितसाधनतैवप्रवर्तनात्वेन

क्तः कल्पनीयः तस्य चस्वप्र

रज्ञापकत्वेनक्लृप्तस्य स्व

समीहितसाधनत्वस्य स्व

समीहितसाधनत्वक

त्वेनएतन्मतेपिविधे

विध्यर्थत्वे

तेनरूपेण

रूपेणाविध्य

तासेवप्रवर्त्तना

इदं पुस्तकं काश्यां गोवर्धनदासाभिधेयेन मया हरिहर रत्ना
न्माल ये ङ्कित म यह सब पुस्तक काशी मे कुंजगली के दुकान पर है

CC-0. Gurukul Kangri Collection, Haridwar

मिहितापुरुषप्रवृत्तिंभावयतीतिभाव्यतालिङ्गादय ... ः पंमोनेप्राभ्यपाग ...

ायापूर्वे
स्यनि

Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar